भगवांस्तत्र भूतात्मा स्वयम्भूर्बहुधात्मकः ।
ब्रह्मा भवति वश्यात्मा सर्वात्मा सर्वभावनः ॥ १२० ॥
न कथञ्चन गन्तव्यं कुरूणामुत्तरेण च ।
अन्येषामपि भूतानां न तत्र क्रमते गतिः ॥ १२१ ॥
स हि सोमगिरिर्नाम देवानामपि दुर्गमः ।
तमालोक्य ततः शीघ्रमुपावर्तितुमर्हथ ॥ १२२ ॥
तस्य शैलस्य पार्श्वेषु नोपरिष्टात् कथञ्चन ।
कान्तारेषु च शून्येषु निर्झरेषु गुहासु च ॥ १२३ ॥
उद्यानेषु च रम्येषु गन्धर्वभवनेषु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १२४ ॥
अवगम्य तु वैदेहीं निलयं रावणस्य च ।
मासादूर्द्ध्वं न वस्तव्यं वसन् बध्यो भवेन्मम ॥ १२५ ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ।
अभास्करममर्यादं न जानामि ततः परं ॥ १२६ ॥
सर्वमेतदशेषेण मार्गितव्यं प्रयत्नतः ।
यदन्यदपि नोद्दिष्टं तत्रापि क्रियतां मतिः ॥ १२७ ॥

ततः कृतं दाशरथेर्महत् प्रियं
महत्तरं चापि ततो मम प्रियं ।
कृतं भविष्यत्यनलानिलोपमा
विदेहजादर्शनजेन कर्मणा ॥ १२८ ॥

ततः कृतार्थाः सहिताः सबान्धवा
　　मयार्चिताः सर्वगुणैर्मनोरमैः ।
यथेप्सितं शीघ्रमथ प्लवङ्गमाः
　　सहप्रिया भूतधरां चरिष्यथ ॥ १२९ ॥

इत्येवमुक्ता हरयोऽथ शीघ्रं
　　रामं ससुग्रीवमनन्तवीर्यं ।
शिरोभिरुर्व्यां सहिताः प्रणम्य
　　जग्मुर्दिशं वैश्रवणाभिगुप्तां ॥ १३० ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे पश्चिमदिग्निर्देशो नाम
त्रिचत्वारिंशः सर्गः — उत्तरदिग्निर्देशो नाम
चतुश्चत्वारिंशः सर्गः ॥

XLV.

तदुग्रशासनं भर्तुर्विज्ञाय हरिपुङ्गवाः ।
शलभा इव संछाद्य पृथिवीं संप्रतस्थिरे ॥ १ ॥
पूर्वां तु दिशमास्थाय विनतः प्लवगैः सह ।
प्रतस्थे कपिशार्दूलो वानरैर्बहुभिर्वृतः ॥ २ ॥
ताराङ्गदाभ्यां सहितः प्लवगः पवनात्मजः ।
अगस्त्यचरितामाशां प्रतस्थे प्लवगैः सह ॥ ३ ॥
सुषेणः कपिशार्दूलो हृष्टो वरुणपालितां ।
प्रतस्थे विक्रमोपेतैः सुदुर्गां प्लवगैः सह ॥ ४ ॥
उत्तरां तु दिशं दुर्गां गिरिराजसमावृतां ।
वीरः शतबलिर्नाम ययौ बहुबलानुगः ॥ ५ ॥
सागरान् पर्वतानूपान् सरितः पत्तनानि च ।
सर्वाणि कपयो जग्मुर्नदन्तो भीमविक्रमाः ॥ ६ ॥
अनुशिष्टा यथा सर्वे सुग्रीवेण वनौकसः ।
स्वां स्वां दिशमभिप्रेत्य त्वरिताः संप्रतस्थिरे ॥ ७ ॥
नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
क्ष्वेडन्तो धावमानाश्च प्रययुस्ते महाजवाः ॥ ८ ॥
आनेष्यामो वयं सीतामपि मृत्युमुखागतां ।
पातालतलसंस्थां वा यदिवाप्युदधिं गतां ॥ ९ ॥

प्रतिज्ञां चक्रिरे वीराः प्लवमाना महौजसः ।
अहमेको हनिष्यामि रावणं दुष्टमाहवे ॥ १० ॥
तथैवोन्मथ्य तरसा हरिष्ये जनकात्मजां ।
किं बहूनां श्रमेणाद्य भवद्भिः श्रूयतामिह ॥ ११ ॥
अहमेवानयिष्यामि पातालादपि जानकीं ।
विधमिष्याम्यहं वृक्षांश्चालयिष्यामि पर्वतान् ॥ १२ ॥
वसुधां दारयिष्यामि क्षोभयिष्यामि सागरान् ।
अहं योजनविंशानां प्लविता नात्र संशयः ॥ १३ ॥
अबुद्धिर्वानरपतिर्यः क्षोभयति वानरान् ।
अहमेको भविष्यामि कार्यस्यैतस्य साधकः ॥ १४ ॥
भूतले सागरे वापि सरिच्छैलेषु वा पुनः ।
पातालस्यापि वा मध्ये न विहन्येत मे गतिः ॥ १५ ॥
एवमेकैकशस्तत्र वानरा बलदर्पिताः ।
ऊचुस्ते वचनं तस्मिन् हरिराजस्य संगमे ॥ १६ ॥
एवमुक्त्वा हरिश्रेष्ठाः स्वां स्वां दिशं महाबलाः ।
तदाजग्मुर्महात्मानः सुग्रीवस्य हितैषिणः ॥ १७ ॥
इति राजा दिशः सर्वाः संप्रस्थाप्य विचारकान् ।
कपिसेनापतीन् मुख्यान् सुग्रीवो मुदितोऽभवत् ॥ १८ ॥
रामः प्रस्रवणे तस्मिन् न्यवसत् सहलक्ष्मणः ।
प्रतीक्षमाणस्तं मासं सीताधिगमने कृतं ॥ १९ ॥

XLVI.

गतेषु वानरेन्द्रेषु रामः सुग्रीवमब्रवीत् ।
कथं त्वया महाबाहो दृष्टपूर्वा वसुंधरा ॥ १ ॥
कथं भवान् विजानीते सुदुर्वेदमिदं महत् ।
पृथिवीमण्डलं सर्वं कथं त्वं गतवानसि ॥ २ ॥
एवमुक्तस्तु रामेण सुग्रीवः प्लवगाधिपः ।
उवाच श्रूयतां राम यथा दृष्टं मया पुरा ॥ ३ ॥
यस्ते मया समाख्यातो दुन्दुभिर्नाम दानवः ।
बलदर्पसमुत्सिक्तो निहतो बालिना रणे ॥ ४ ॥
महिषो नाम तेजस्वी दुन्दुभेः पूर्वजः स्मृतः ।
बलं नागसहस्रस्य धारयन्नकुतोभयः ॥ ५ ॥
बलदर्पसमुत्सिक्तस्त्रासयन् वनगोचरान् ।
किष्किन्धाद्वारमासाद्य समाहूय च बालिनं ॥ ६ ॥
स तेन निहतः संख्ये यथा ते बहुशः श्रुतं ।
तस्मिंश्चिरायमाणे च यथाक्रममभिषेचितः ॥ ७ ॥
अभिषिक्तं च मां दृष्ट्वा चिरादागत्य कोपनः ।
स मां निरस्त्यक्तवान् बाली चतुर्भिः सचिवैः सह ॥ ८ ॥
ततो जवेन काकुत्स्थ विद्रुतोऽहं भयातुरः ।
उत्सार्यमाणस्तेनाहं दृष्टवान् सर्वतो महीं ॥ ९ ॥
नदीश्च विविधाः पश्यन् [illegible]राणि वनानि च ।

ततः पूर्वामहं गत्वा दक्षिणां दिशमाश्रितः ॥ १० ॥
दिशं च पश्चिमां भूयो गतोऽस्मि भयशङ्कितः ।
चिराच्च वायुपुत्रो मां संस्मृत्येदं वचोऽब्रवीत् ॥ ११ ॥
शप्तो बाली मतङ्गेन पुरा महिषकारणात् ।
इह ते न प्रवेष्टव्यमृष्यमूकवनं कपे ॥ १२ ॥
शतधा ते स्फुटेन्मूर्धा प्रविशेस्त्वमिदं यदि ।
इदानीं मे स्मृतो राजन्नृष्यमूको महागिरिः ॥ १३ ॥
तं तु गच्छाम वै सर्वे तत्रासौ न भविष्यति ।
ततोऽहं तद्भयाक्रान्तः शतकृत्वा वसुन्धरां ॥ १४ ॥
हनूमत इति श्रुत्वा प्रविष्टोऽस्मि तमाश्रमं ।
समागतस्त्वया यत्र मया सख्यमवाप्य ते ॥ १५ ॥
नाचिन्तयं रिपुं यत्र मतङ्गभयमोहितं ।
यत्राभिषेचितो राज्ये त्वयाहं रघुनन्दन ॥ १६ ॥
निहत्य बालिनं संख्ये भयमुत्सृज्य दूरतः ।
एवं राघव तत्त्वेन मयैषा पृथिवी तदा ॥ १७ ॥
जम्बुद्वीपश्च विस्तीर्णः प्रत्यक्षमुपलक्षितः ।
पृथिवीमण्डलं कृत्स्नं शैला नद्यो वनानि च ।
दृष्टमेतन्मया राजन् यन्मां त्वं परिपृच्छसि ॥ १८ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे वानरप्रयाणं नाम पञ्चचत्वारिंशः सर्गः — पृथिवीमण्डलपरिज्ञाननिवेदनं नाम षट्चत्वारिंशः सर्गः ॥

XLVII.

अन्विष्यन्तस्ततः सीतां सर्वे ते कपियूथपाः ।
पृथिवीं परिचिन्वन्तः सशैलवनकाननां ॥ १ ॥
व्यादिष्टाः कपिसिंहेन यथोक्तं सर्व एव हि ।
व्यचिन्वन्त दिशः सर्वाः सीताधिगमने तदा ॥ २ ॥
ते सरांसि गिरीन् सर्वान् सङ्कटानि वनानि च ।
दरीर्दुर्गांश्च शैलांश्च कृत्स्नांस्तानभिचक्रमुः ॥ ३ ॥
निर्झराणि नितम्बांश्च विचिन्वन्तस्ततस्ततः ।
सुग्रीवेणाभिसंख्यातान् देशांस्ते वानरर्षभाः ॥ ४ ॥
विचेरुर्वृक्षबहुलान् सानुप्रस्थाननेकशः ।
सर्वे सर्वनिवासांश्च सीताधिगमने धृताः ॥ ५ ॥
समागच्छन् तु मेदिन्या दिग्भागेषु प्लवङ्गमाः ।
संवर्तयन्तः शैलेषु वानरा विविधांस्तरून् ॥ ६ ॥
विचेयं प्रथमे मासि कृत्वा प्रस्रवणे गिरौ ।
कपिराजं समासेदुर्निराशा हरियूथपाः ॥ ७ ॥
विचित्य तु दिशं पूर्वां विनतः प्लवगैः सह ।
अदृष्ट्वैव ततः सीतां किष्किन्धामाजगाम सः ॥ ८ ॥
उत्तरां तु दिशं सर्वां विचित्य स महाकपिः ।
अदृष्ट्वागतः सीतां वीरः शतबलिर्हरिः ॥ ९ ॥

सुषेणः पश्चिमां गत्वा प्राप्य प्रस्रवणं गिरिं ।
निवृत्य मासे संपूर्णे सुग्रीवं संददर्श ह ॥ १० ॥
ते प्रस्रवणपार्श्वस्थमभिगम्याभिवाद्य च ।
आसीनं सह रामेण सुग्रीवमिदमब्रुवन् ॥ ११ ॥
विचिताः पर्वताः सर्वे वनानि गहनानि च ।
निम्नगाः सागरान्ताश्च सर्वे जनपदास्तथा ॥ १२ ॥
गुहाश्च विविधाकाराः संक्रमाः परिवर्तिताः ।
उद्धूताश्च लतागुल्मास्तृणं च विदलीकृतं ॥ १३ ॥
महातेजांसि घोराणि महासत्त्वबलानि च ।
सत्त्वान्यतिप्रवृद्धानि त्रासितानि हतानि च ॥ १४ ॥
रावणं मन्यमानैश्च तत्र तत्र प्लवङ्गमैः ।
प्रविशन्ति नदन्तश्च धावन्तश्च प्लवङ्गमाः ॥ १५ ॥
प्लवमाना व्रजन्तश्च पर्यधावन्त वानराः ।
ये चैव गहना देशा विचितास्ते पुनः पुनः ॥ १६ ॥
आगमप्रतिकारश्च वानरैस्तत्र चेष्टितः ।
प्रवृत्तिर्न च वैदेह्याः क्वचिदप्युपलभ्यते ॥ १७ ॥
हनूमान् राघवार्थे तु यत्नवान् प्रियदर्शनः ।
आगमं तस्य काङ्क्षामो ध्रुवं सोऽधिगमिष्यति ॥ १८ ॥
उदारसत्त्वाभिजनो हनूमान् स मैथिलीं ज्ञास्यति वानरेन्द्रः ।
दिशं च यामेव हता हि सीता तामाश्रितो वायुसुतो महात्मा ।१९।

XLVIII.

अथाङ्गदमुखैः सार्द्धं हनूमान् वानरैस्ततः ।
सुग्रीवेण यथोद्दिष्टो दक्षिणामगमद्दिशं ॥ १ ॥
स विन्ध्यवनमागम्य सर्वैस्तैर्हरिभिर्वृतः ।
विचिनोति स्म विन्ध्यस्य गुहाश्च गहनानि च ॥ २ ॥
शैलाग्राणि नदीं दुर्गां कन्दराणि वनानि च ।
वृक्षषण्डांश्च विस्तीर्णान् सर्वान् सवनपादपान् ॥ ३ ॥
अन्वेषमाणास्तु तथा सर्वे ते हरियूथपाः ।
न सीतां ददृशुर्वीरा मैथिलीं जनकात्मजां ॥ ४ ॥
फलमूलानि वन्यानि भक्षयन्तो वने चराः ।
जानकीं मृगयामासुः पिबन्तः सलिलं शुचि ॥ ५ ॥
तत्रैव वसतां तेषां स कालो व्यत्यवर्तत ।
स हि देशो दुरन्वेष्यो गुहागहनवान् महान् ॥ ६ ॥
त्यक्का तु तं ततो देशं सर्वे ते हरियूथपाः ।
देशमन्यं दुराधर्षमन्वैषन्नकुतोभयाः ॥ ७ ॥
यत्र वै निष्फला वृक्षा निष्पत्राः पुष्पवर्जिताः ।
निस्तोयाः सरितो यत्र यत्र मूलं सुदुर्लभं ॥ ८ ॥
न सन्ति महिषा यत्र न मृगा नापि हस्तिनः ।
शार्द्दूलाः पक्षिणो वापि ये चान्ये वनगोचराः ॥ ९ ॥

स्निग्धपत्राः स्थलेजाताः पद्मिन्यः फुल्लपङ्कजाः ।
प्रेक्षणीयाः सुगन्धाश्च भ्रमरैः परिशिञ्जिताः ॥ १० ॥
कण्ठो नाम महाभागः सत्यवादी तपोधनः ।
महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः ॥ ११ ॥
तस्य तस्मिन् वने पुत्रो बालको दशवार्षिकः ।
प्रनष्टो जीवितान्ताय क्रुद्धः सोऽभून्महामुनिः । ॥ १२ ॥
तेन धर्मात्मना शप्तं सर्वं तत् सुमहद्वनं ।
ततोऽभवदनाधृष्यं मृगपक्षिगणैरपि ॥ १३ ॥
तत्र ते काननान्तानि गिरीणां निर्झराणि च ।
गहनानि नदीनां च व्यचिन्वन् सहिताः समं ॥ १४ ॥
तत्रापि ते महात्मानो नापश्यन् जनकात्मजां ।
हर्तारं रावणं वापि रामस्याप्रियकारिणं ॥ १५ ॥
अवगतं तु ते कृत्वा तत् सर्वं काननं पुनः ।
अन्यदेव महाघोरं प्राविशन् गिरिगह्वरं ॥ १६ ॥
ते प्रविश्य तु तद्भीमं लतागुल्मसमावृतं ।
ददृशुः सुमहाकायमसुरं सुरनिर्भयं ॥ १७ ॥
तं दृष्ट्वा वानरा भीमं स्थितं शैलमिवापरं ।
गाढं परिदधुः सर्वे तस्मिन् पतितचक्षुषः ॥ १८ ॥
सोऽपि मारीचतनयस्तृणवत् तानपश्यत ।
तमङ्गदः सुसंक्रुद्धो युद्धाय समुपाद्रवत् ॥ १९ ॥

राक्षसोऽपि सुसंक्रुद्धस्तिष्ठ तिष्ठेत्युपाह्वय ।
मुष्टिमुद्यम्य विनदन्नङ्गदं समुपाद्रवत् ॥ २० ॥
तमापतन्तं वेगेन बालिपुत्रोऽङ्गदो बली ।
रावणोऽयमिति ज्ञात्वा तलेनाभिजघान ह ॥ २१ ॥
स बालिपुत्राभिहतो वक्त्राच्छोणितमुद्गिरन् ।
राक्षसो न्यपतद्भूमौ वज्राहत इव द्रुमः ॥ २२ ॥
ते तु तस्मिन् निपतिते वानरा जितकाशिनः ।
प्रव्यचिन्वन् प्रयत्नेन सर्वं तं गिरिगह्वरं ॥ २३ ॥
ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः ।
एकान्ते वृक्षमूलेषु निषेदुर्दीनमानसाः ॥ २४ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे वानरप्रत्यागमनं नाम
सप्तचत्वारिंशः सर्गः—असुरबधो नाम
अष्टाचत्वारिंशः सर्गः ॥

XLIX.

ततो वायुसुतः श्रीमानङ्गदप्रमुखान् कपीन् ।
आसीनानब्रवीद्धीमान् वाक्यं वाक्यविशारदः ॥ १ ॥
परिश्रान्तान् महाप्राज्ञः समानीय शनैरिदं ।
सानूनि गिरयो नद्यो दुर्गाणि गहनानि च ॥ २ ॥
निर्झरा गिरिशृङ्गाणि वनान्युपवनानि च ।
गुह्यकानां निवासाश्च गन्धर्वभवनानि च ॥ ३ ॥
गुहाश्च विविधाकारा मार्गितानि ततस्ततः ।
विचितं च वनं सर्वं तृणं च विदलीकृतं ॥ ४ ॥
पश्यामो न च वैदेहीं रावणं चापि राक्षसं ।
सुग्रीवेण यथोद्दिष्टा देशाः सुविचिताः कृताः ॥ ५ ॥
यांश्च नोद्दिष्टवान् देशांस्ते चापि विचिताः पृथक् ।
नैव प्रवृत्तिं शृणुमस्तयोः कस्यचिदन्तिकात् ॥ ६ ॥
कालश्च सुमहान् यातो मार्गतां जनकात्मजां ।
कृतश्च कालपर्यन्तः सुग्रीवश्चोग्रशासनः ॥ ७ ॥
न च सा दृश्यते सीता रामपत्नी च रावणः ।
उच्यतामत्र दुर्धर्षा यत्नः क्षेममनन्तरं ॥ ८ ॥
न हि सा दृश्यते सीता यन्निमित्तं भ्रमामहे ।
एवं ब्रुवाणं तं वाक्यमङ्गदः पवनात्मजं ॥ ९ ॥

उवाच वचनं वीरो वानराणां हितावहं ।
सर्व एव समर्थाश्च बलवन्तश्च वानराः ॥ १० ॥
अलं नैराश्यमागत्य सीताधिगमनं प्रति ।
ते वयं परिमार्गामः पुनस्तां जनकात्मजां ॥ ११ ॥
संत्यज्यापि प्रियान् प्राणान् यथा पश्याम मैथिलीं ।
अनिर्वेदश्च दाक्ष्यं च मनसश्च पराजयः ॥ १२ ॥
अवश्यं क्रियमाणस्य कर्मणो दृश्यते फलं ।
यद्यप्येतद्वनं सर्वं विचितं हि समाहितैः ॥ १३ ॥
खेदं त्यक्त्वा पुनः सर्वं विचिन्वन्तु वनौकसः ।
अलं निर्वेदमागत्य न हि नो कीदृशं क्षमं ॥ १४ ॥
सुग्रीवः क्रोधनो राजा तीक्ष्णदण्डश्च वानरः ।
भेतव्यं तस्य शूरस्य रामस्य च महात्मनः ॥ १५ ॥
हितार्थमेतदुक्तं मे क्रियतां यदि रोचते ।
उच्यतां वा क्षमं यन्नः सर्वेषामेव वानराः ॥ १६ ॥
अङ्गदस्य तु तच्छ्रुत्वा वचनं गन्धमादनः ।
उवाच प्रसृतं वाक्यं सर्ववानरसंनिधौ ॥ १७ ॥
सदृशं चानुरूपं च वाक्यमङ्गदभाषितं ।
हितं च पथ्यं च भवेत् क्रियमाणं न संशयः ॥ १८ ॥
पुनर्मार्गामहे शैलान् सकन्दरगुहान्तरान् ।
काननानि विचित्राणि नदीः प्रस्रवणानि च ॥ १९ ॥

यथोद्दिष्टानि सर्वाणि सुग्रीवेण महात्मना ।
निश्चयं परमं कृत्वा विचिन्वन्तु वनौकसः ॥ २० ॥

ततः सर्वे समुत्थाय वानरास्ते महाबलाः ।
विन्ध्यकाननसंकीर्णां विचेरुर्दक्षिणां दिशं ॥ २१ ॥

ते शारदाभ्रप्रतिमं नगं रजतसंनिभं ।
शृङ्गवन्तं दरीवन्तमारोहन् हरिपुङ्गवाः ॥ २२ ॥

तत्र लोध्रवनं रम्यं सप्तपर्णवनानि च ।
व्यचिन्वंस्ते हरिवराः सीतादर्शनकाङ्क्षिणः ॥ २३ ॥

तस्याग्रमधिरूढास्ते श्रान्ताः सुलघुविक्रमाः ।
न चापश्यन्त वैदेहीं रामस्य महिषीं प्रियां ॥ २४ ॥

ते तु दृष्टिहतं कृत्वा तं शैलं बहुकन्दरं ।
अवारोहन्त हरयः प्रविचित्य समन्ततः ॥ २५ ॥

अवरुह्य च ते भूमिं श्रान्ता दुःखितचेतसः ।
स्थिता मुहूर्त्तं तत्रासन् वृक्षमूलान्युपाश्रिताः ॥ २६ ॥

ते मुहूर्त्तं समाश्वस्ताः किञ्चिद्भष्टपरिश्रमाः ।
पुनरेवोद्यताः कृच्छ्रान्मार्गितुं जनकात्मजां ॥ २७ ॥

दरीशिखरनद्योघलतापादपसंकुलं ।
विन्ध्यं वानरमुख्यास्ते मार्गन्ति स्म समन्ततः ॥ २८ ॥

प्रयत्नतस्ते हरयः समन्ततो गुहासु शैलान्तरनिर्झरेषु ।
अन्विष्यमाणा जनकात्मजां च भ्रमन्ति तस्मिन् गिरिसंकटे तदा ।२९।

L.

तमासाद्याङ्गदमुखैर्हरिभिर्हनुमांस्तदा ।
व्यचिनोत् तस्य विन्ध्यस्य गुहाश्च गहनानि च ॥ १ ॥
ते मार्गमाणाः संरब्धा रामार्थे त्यक्तजीविताः ।
घोराणि गिरिदुर्गाणि प्रविशन्ति प्लवङ्गमाः ॥ २ ॥
तेषां तत्रैव वसतां स कालो व्यत्यवर्तत ।
स हि देशो दुराधर्षो लतागहनवान् महान् ॥ ३ ॥
ततो भूयो विचिन्वाना हनूमत्प्रमुखास्तदा ।
वृक्षच्छायोपविष्टास्ते दृष्ट्वान्योन्यं समब्रुवन् ॥ ४ ॥
परस्परेणावहिताः सीतादर्शनकाङ्क्षिणः ।
गयो गवाक्षो गवयः शरभो गन्धमादनः ॥ ५ ॥
मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवान् नलः ।
अङ्गदो युवराजश्च तारश्च वनगोचरः ॥ ६ ॥
गिरिजालावृतां दुर्गां मार्गित्वा दक्षिणां दिशं ।
क्षुत्पिपासापरिश्रान्ताः क्लान्ताश्च सलिलार्थिनः ॥ ७ ॥
जलं च सीतां च पुनर्मृगयामासुरातुराः ।
समागम्य ततः सर्वे श्रमार्त्ता वनगोचराः ॥ ८ ॥
जग्मुर्विषादं संत्रस्ताः सुग्रीवाद्वानराधिपात् ।
ते विषण्णमुखा दीनाः सुग्रीवभयमोहिताः ॥ ९ ॥
अवीक्षमाणाः सीतां च रावणं च सुदुःखिताः ।

बुभुक्षिताः परिश्रान्तास्तृषिताः सलिलार्थिनः ॥१०॥
अथावदीर्णं ददृशुर्विलं वृक्षैः समावृतं ।
तमसा महता ग्रस्तमिन्द्रस्यापि भयावहं ॥११॥
ततः क्रौञ्चाश्च हंसाश्च सारसाः कृकरास्तथा ।
जलार्द्राश्चक्रवाकाश्च पद्मरेणुविभिरञ्जिताः ॥१२॥
कुररा मञ्जुलाश्चैव तथैव चलकुक्कुटाः ।
रक्ताङ्गाश्चैव कादम्बा निष्पतन्तः समन्ततः ॥१३॥
कलहंसाः प्लवाश्चैव तथान्ये जलचारिणः ।
ते तु दृष्ट्वा विलं सर्वे विस्मयाकुलचेतसः ॥१४॥
अभवन् दीनमनसो हृष्टाश्च जलशङ्कया ।
ततः पर्वतसंकाशो हनूमान् मारुतात्मजः ॥१५॥
समेतान् वानरान् सर्वानिदं वचनमब्रवीत् ।
गिरिजालावृतां दुर्गां मार्गित्वा दक्षिणां दिशं ॥१६॥
वयं सर्वे परिश्रान्ता न च पश्याम मैथिलीं ।
अस्मादपि तु पश्यामो विलान्निष्पततो बहून् ॥१७॥
जले चरान् पक्षिगणान् शतशोऽथ सहस्रशः ।
नूनं सलिलवानत्र कूपो वा यदिवा ह्रदः ॥१८॥
भविष्यति तथा ह्येते निष्पतन्ति पतत्रिणः ।
प्रविश्यात्रापनेष्यामस्त्रासं सलिलजं वयं ॥१९॥
सीतां च मृगयिष्यामः सर्वत्रास्मिन् महाविले ।

व्यक्तं बहूदको ह्यत्र भविष्यति महाह्रदः ॥ २० ॥
इत्युक्ता तद्बिलं सर्वे विविशुस्तमसावृतं ।
अचन्द्रसूर्यं हरयो भीकरं लोमहर्षणं ॥ २१ ॥
ततस्तस्मिन् बिले दुर्गे लतापादपसंकुले ।
हनूमानग्रतस्तेषामङ्गदाद्या अनन्तरं ॥ २२ ॥
अन्योन्यं संपरिष्वज्य जग्मुर्योजनमन्तरं ।
स्वसंज्ञया विमूढास्ते वानराश्चक्रुरारवं ॥ २३ ॥
ते नष्टसंज्ञास्तृषिताः संभ्रान्ताः सलिलार्थिनः ।
विविशुस्तद्बिलं घोरं मासमात्रं प्लवङ्गमाः ॥ २४ ॥
ते कृशा दीनवदनाः परिश्रान्ताः पिपासिताः ।
यदृच्छयैव ददृशुरालोकं सूर्यसंनिभं ॥ २५ ॥
ततस्तं देशमागम्य प्रनष्टतिमिरं शुभं ।
ददृशुः काञ्चनान् वृक्षान् वैश्वानरसमप्रभान् ॥ २६ ॥
सालान् प्रियङ्गून् वकुलान् पनसांश्चम्पकान् वरान् ।
अशोकान् नागपुष्पांश्च नानाशकुनिनादितान् ॥ २७ ॥
तरुणादित्यसंकाशान् रक्तैः किसलयैर्वृतान् ।
जातरूपमयैश्चापि चरद्भिर्मत्स्यकच्छपैः ॥ २८ ॥
नलिनीस्तत्र ददृशुः प्रसन्नसलिलाः शुभाः ।
काञ्चनानि विमानानि स्फाटिकानि गृहाणि च ॥ २९ ॥
तापनीयगवाक्षाणि मुक्ताजालान्तराणि च ।

हैमराजतभौमानि वैडूर्यमणिवन्ति च ॥३०॥
प्रभया भ्राजमानानि विचित्राणि वृहन्ति च ।
ददृशुस्तत्र हरयो रत्नराशीन् समन्ततः ॥३१॥
दन्तकाञ्चनचित्राणि शयनान्यासनानि च ।
स्वास्तीर्णानि विशालानि ददृशुस्ते वनौकसः ॥३२॥
हैमराजतकांस्यानां भाजनानां च संचयान् ।
शुचीन्यभ्यवहार्याणि मूलानि च फलानि च ॥३३॥
महार्हाणि च पानानि मधूनि विविधानि च ।
कुथानां कम्बलानां च राङ्कवाणां च संचयान् ॥३४॥
अगुरूणां सुगन्धानां चन्दनानां तथैव च ।
वाससां च महार्हाणामजिनानां च संचयान् ॥३५॥
तत्र तत्र प्रदीप्तांश्च काञ्चनानां च संचयान् ।
ददृशुर्वानरा दिव्यान् वैश्वानरशिखोपमान् ॥३६॥
ददृशुस्तत्र चासीनां विष्टरे काञ्चने शुभे ।
तापसीं नियताहारां चीरकृष्णाजिनाम्बरां ॥३७॥
ततो हनूमान् गिरिसंनिकाशः कृताञ्जलिस्तामभिवाद्य विद्वान् ।
पप्रच्छ का त्वं भवनं विलं च रत्नानि चेमानि वराणि कस्य ॥३८॥

इत्यार्षे रामायणे किष्किन्धाकाण्डे दक्षिणस्यां दिशि
सीतान्वेषणं नाम ऊनपञ्चाशः सर्गः — विलप्रवेशो
नाम पञ्चाशः सर्गः ॥

LI.

अथ तां हनूमान् प्राह्ः पुनः कृष्णाजिनाम्बरां ।
अब्रवीत् सुमहाभागां तापसीं शंसितव्रतां ॥ १ ॥
वानराः स्म महाभागे सततं वनगोचराः ।
इदं प्रविष्टाः सहसा विलं तिमिरसंवृतं ॥ २ ॥
क्षुधिताश्च परिश्रान्ताः परिखिन्नाः पिपासिताः ।
इदं धरण्या विवरं प्रविष्टाः स्म जलार्थिनः ॥ ३ ॥
दृष्ट्वाद्भुतमिदं दिव्यं श्रीमत् सुगहनं विलं ।
भूयो वयं प्रव्यथिताः संभ्रान्ता नष्टचेतसः ॥ ४ ॥
कस्येमे काञ्चना वृक्षास्तरुणादित्यसंनिभाः ।
पुष्पिताः फलिताश्चापि पुण्याः सुरभिगन्धिनः ॥ ५ ॥
शुचीन्यभ्यवहार्याणि मूलानि च फलानि च ।
काञ्चनानि विमानानि राजतानि गृहाणि च ॥ ६ ॥
तापनीयगवाक्षाणि मुक्ताजालान्तराणि च ।
इमे जाम्बूनदमयाः पादपाः कस्य तेजसा ॥ ७ ॥
पद्मानि च महार्हाणि सुगन्धीनि कथं त्विह ।
कथं मत्स्याश्च सौवर्णाश्चरन्ति विमले जले ॥ ८ ॥
आत्मानमनुभावं च यस्य चेदं महद्विलं ।
अजानतां नः सर्वेषां व्यक्तं व्याख्यातुमर्हसि ॥ ९ ॥

एवमुक्ता हनूमता तापसी धर्मचारिणी ।
प्रत्युवाच हनूमन्तं सर्वभूतहिते रता ॥ १० ॥
मयो नाम महातेजा मायावी दानवर्षभः ।
तेनेदं निर्मितं सर्वं मायया काञ्चनं बिलं ॥ ११ ॥
पुरा दानवमुख्यानां विश्वकर्मा बभूव सः ।
तेनेदं काञ्चनमयं निर्मितं भवनोत्तमं ॥ १२ ॥
स हि वर्षसहस्राणि तपस्तप्त्वा महावने ।
पितामहाद्वरं लेभे सर्वमौशनसं बलं ॥ १३ ॥
विहाय मृत्युं बलवान् सर्वकामेश्वरस्तदा ।
उवास सुखितः कालं कञ्चिदस्मिन् महाबिले ॥ १४ ॥
तमप्सरसि हेमायां सक्तं दानवपुङ्गवं ।
आगत्याशनिमादाय निजघान पुरन्दरः ॥ १५ ॥
तदिदं ब्रह्मणा दत्तं हेमायां वनमुत्तमं ।
शाश्वताः कामभोगाश्च गृहं चेदं हिरण्मयं ॥ १६ ॥
दुहिता हेमसावर्णेरहं नाम्ना स्वयम्प्रभा ।
इदं रक्षामि भवनं हेमाया वानरर्षभाः ॥ १७ ॥
मम प्रियसखी हेमा नृत्यगीतविशारदा ।
तया सखित्वाद्बद्धाहं रक्षामि भवनोत्तमं ॥ १८ ॥
एवमुक्ते शुभे वाक्ये तापस्या धर्मसंहिते ।
हनूमान् कपिशार्दूलः प्रत्युवाच स्वयम्प्रभां ॥ १९ ॥

अर्थिनः स्म प्रयच्छार्ये जलं जलजलोचने ।
म्रियमाणान् निराहारान् संजीवयितुमर्हसि ॥ २० ॥
सा तु तस्य वचः श्रुत्वा तापसी धर्मचारिणी ।
आदाय फलमूलानि विधिनोपजहार ह ॥ २१ ॥
प्रतिगृह्य तु ते तस्यास्तदातिथ्यं वने चराः ।
विधिवद्भक्षयामासुस्तां चैव समपूजयन् ॥ २२ ॥
ते भक्षयित्वा तत् सर्वं पीत्वा च विमलं जलं ।
सर्वे ददृशुरालोकं सर्वतो हरियूथपाः ॥ २३ ॥
प्रसन्नमनसः सर्वे सर्वे च विगतज्वराः ।
संजातबलरूपाश्च तत्रासन् हरियूथपाः ॥ २४ ॥
अथ तानब्रवीत् सर्वान् संहृष्टान् वनगोचरान् ।
इदं वचनमव्यग्रं तापसी ब्रह्मचारिणी ॥ २५ ॥
किं कार्यं कस्य वा हेतोः कान्ताराणि समाश्रिताः ।
कथं चेदं विलं दुर्गं युष्माभिरुपलक्षितं ॥ २६ ॥
वानरा यदि वः खेदः प्रनष्टो मूलभक्षणात् ।
यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि कथ्यतां ॥ २७ ॥
तस्यास्तद्वचनं श्रुत्वा हनूमान् मारुतात्मजः ।
आर्जवेन यथा तत्त्वमाख्यातुमुपचक्रमे ॥ २८ ॥
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ।
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकं वनं ॥ २९ ॥

लक्ष्मणेन सह भ्रात्रा भार्यया चापि सीतया ।
तस्य भार्या जनस्थाने रावणेन हृता बलात् ॥३०॥
तस्य वीरः सखा प्राज्ञः सुग्रीवो नाम वानरः ।
राजा वानरवीराणां येन प्रस्थापिता वयं ॥३१॥
अगस्त्यचरितामाशां दक्षिणां यमरक्षितां ।
सहैभिर्वानरैर्वीरैरङ्गदप्रमुखैर्वृताः ॥३२॥
रावणं सहिताः सर्वे राक्षसं कामरूपिणं ।
सीतया सह वैदेह्या मार्गधमिति चोदिताः ॥३३॥
विचिन्वन्तो वयं सर्वे समग्रां दक्षिणां दिशं ।
नाधिगच्छामो वैदेहीं रावणं चापि तं रिपुं ॥३४॥
बुभुक्षिताः परिश्रान्ता वृक्षमूलान्युपाश्रिताः ।
विवर्णवादनाः सर्वे सुग्रीवभयकर्षिताः ॥३५॥
तृष्णया चार्दिताः सर्वे सर्वे ध्यानपरायणाः ।
नाधिगच्छामहे पारं मग्नाश्चिन्तामहार्णवे ॥३६॥
चारयन्तस्ततश्चक्षुः पश्यामो विवृतं विलं ।
लतापादपसंछन्नं महदास्यमिव क्षितेः ॥३७॥
ततो हंसाः समुत्पेतुः पक्षैः सजलशीकरैः ।
कुरराः सारसाश्चैव मञ्जुलाश्चक्रसाह्वयाः ॥३८॥
कादम्बा जलपृक्ताश्च तथान्ये च जले चराः ।
ततो नो मतिरुत्पन्ना दृष्ट्वा तान् जलचारिणः ॥३९॥

साधत्र प्रविशामेति मयोक्ता वै प्लवङ्गमाः ।
एषामपि च सर्वेषामैकमत्यमुपागतं ॥ ४० ॥
गच्छामः प्रविशामेति भर्तृकार्ये त्वरावतां ।
परिगृह्य ततो गाढं वयं हस्तं परस्परं ॥ ४१ ॥
इदं प्रविष्टाः सहसा विलं तिमिरसंवृतं ।
एतन्नः कार्यमेतेन कृत्येन विलमागताः ॥ ४२ ॥
त्वां चैवोपगताः सर्वे म्रियमाणा बुभुक्षया ।
आतिथ्यधर्मदत्तानि त्वया मूलफलानि च ॥ ४३ ॥
अस्माभिरुपभुक्तानि बुभुक्षाश्रमकर्षितैः ।
ब्रूहि प्रत्युपकारार्थं किं ते कुर्वन्तु वानराः ॥ ४४ ॥
एवमुक्ता तु सा तत्र तापसी वायुसूनुना ।
प्रत्युवाच ततः सर्वान् वानरान् संशितव्रता ॥ ४५ ॥
सर्वेषां परितुष्टास्मि वानराणां महौजसां ।
चरन्त्या मम धर्मं हि न कार्यमिह केनचित् ॥ ४६ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे स्वयम्प्रभासंवादो नाम एकपञ्चाशः सर्गः ॥

LII.

एवमुक्ते शुभे वाक्ये तापस्या धर्मसंहिते ।
हनूमान् कपिशार्दूलः प्रत्युवाच पुनर्वचः ॥ १ ॥
भवत्यानुगृहीताः स्म सर्व एव वनौकसः ।
कृतमातिथ्यमस्माकं श्रमश्चापगतो महान् ॥ २ ॥
कथितं चापि ते तत्वमस्माभिर्धर्मचारिणि ।
कारणं चापि वैदेह्या मार्गणं ते निवेदितं ॥ ३ ॥
विचितः शतशश्चायं देशो दक्षिणसंश्रितः ।
प्रेषितैर्वानरेन्द्रेण सीतार्थेऽस्माभिरागतैः ॥ ४ ॥
समयश्च कृतस्तेन कपीनां संनिधौ तदा ।
पूर्णे मासि निवर्तध्वं वसन् बध्यो भवेन्मम ॥ ५ ॥
इति प्रतिसमादिष्टा भर्त्रा वयमनिन्दिते ।
विचिन्वन्तो दिशः सर्वा वानराः शीघ्रगामिनः ॥ ६ ॥
वयं तु दक्षिणामाशां सुग्रीवेण प्रचोदिताः ।
समन्तात् परिधावन्तः पश्यामो विवृतं विलं ॥ ७ ॥
प्रविश्य चैव सहसा सीताविचयकारणात् ।
न च पश्यामि निष्काशं विलादस्मात् सुमध्यमे ॥ ८ ॥
एवमुक्ते हनूमता सर्वे ते वानरास्तदा ।
ऊचुः प्राञ्जलयो भूत्वा तापसीं धर्मचारिणीं ॥ ९ ॥

लोलस्वभावैरस्माभिः किञ्चित् तेऽपकृतं यदि ।
सर्वं मर्षयितव्यं ते सर्वैरेव कृतोऽञ्जलिः ॥ १० ॥
एकं तु वयमिच्छामस्त्वां वक्तुं धर्मचारिणि ।
श्रूयतां चाभिधास्यामः सर्व एव तवाग्रतः ॥ ११ ॥
सर्वे परिगता देशा बिलेऽस्मिन् सर्ववानरैः ।
न च पश्याम तं देशं प्रविष्टा येन वानराः ॥ १२ ॥
तदिच्छामो वयं सर्वे बिलादस्मान्मनोरमात् ।
त्वत्प्रसादाद्विनिर्गन्तुं त्वं हि नः परमा गतिः ॥ १३ ॥
यः कृतः समयोऽस्माकं सुग्रीवेण महात्मना ।
स कालः समतिक्रान्तो बिलेऽस्मिन् परिधावतां ॥ १४ ॥
सा त्वमस्माद्बिलात् सर्वानुत्तारयितुमर्हसि ।
तीक्ष्णो हि राजा सुग्रीवः प्रियार्थी राघवस्य च ॥ १५ ॥
महच्च कार्यमस्माभिः कर्तव्यं धर्मचारिणि ॥
तच्चापि न कृतं कार्यमिह नः परिलङ्घनात् ॥ १६ ॥
तद्राजभयभीतानां त्राणं भवितुमर्हसि ।
अस्मानस्माद्बिलाद्दुर्गादुत्तारयितुमर्हसि ॥ १७ ॥
इति ब्रुवाणांस्तान् सर्वान् सर्वभूतहिते रता ।
उवाच परमप्रीता बिलादुत्तारणेच्छया ॥ १८ ॥
इदं विबुधराजेन बिलं शक्रेण संयुगे ।
असुरार्थे विमुक्तेन पुरा वज्रेण दारितं ॥ १९ ॥

दुरासदं सुदुर्धर्षं बहुरत्नसमाकुलं ।
महाप्राज्ञेन पुत्रार्थे निर्मितं विश्वकर्मणा ॥ २० ॥
तस्य वैरातिसर्गेण विलेऽस्मिन् वज्रदारिते ।
जीवितं दुष्करं मन्ये प्रविष्टेन निवर्त्तितुं ॥ २१ ॥
तपसस्तु प्रभावेन नियमोपार्ज्जितेन च ।
सर्व एव विलादस्मान्निर्गमिष्यथ वानराः ॥ २२ ॥
निमीलयत नेत्राणि सर्वे वानरयूथपाः ।
न हि निष्क्रमितुं शक्यं चक्षुषि ह्यनिमीलिते ॥ २३ ॥
ततस्ते हरयः सर्वे सुकुमारतलैः करैः ।
समं न्यमीलयंश्चक्षुर्विनिर्गमनकाङ्क्षिणः ॥ २४ ॥
वानरास्तु महात्मानो हस्तरुद्धमुखास्तथा ।
निमेषान्तरमात्रेण विलान्निःसारितास्तया ॥ २५ ॥
ततः सा तान् समुत्तीर्णान् समाश्वास्येदमब्रवीत् ।
एष विन्ध्यो गिरिः श्रीमान् बहुकन्दरनिर्झरः ॥ २६ ॥
एष प्रस्रवणः शैल एष पार्श्वे महोदधिः ।
स्वस्ति वोऽस्तु गमिष्यामि भवनं वानरोत्तमाः ॥ २७ ॥
इत्युक्ता तद्विलं घोरं प्रविवेश तपस्विनी ।
तपोयोगप्रभावेन निमेषान्तरचारिणी ॥ २८ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे विलनिष्क्रमणं
नाम द्वापञ्चाशः सर्गः ॥

LIII.

वानरास्तु महावीर्या हस्तरुद्धमुखाः स्थिताः
चक्षूंष्युन्मीलयामासुर्मुहूर्त्तात् सर्व एव हि ॥ १ ॥
ततस्ते ददृशुर्घोरं समुद्रं वरुणालयं ।
अपारमिव गर्जन्तं महोरगनिषेवितं ॥ २ ॥
ततस्तं देशमागम्य सौम्यं वितिमिरं शुभं ।
यथाप्राप्तमकृत्वा च ततो वचनमब्रुवन् ॥ ३ ॥
रामस्य भार्यां तां दृष्टुं रावणं च निशाचरं ।
स नः कालो व्यतिक्रान्तो यो राज्ञा समयः कृतः ॥ ४ ॥
ते विन्ध्यस्य गिरेः पार्श्वे संप्रपुष्पितपादपे ।
उपविश्य महाकायाश्चिन्तामापेदिरे परां ॥ ५ ॥
ततः सिंहर्षभस्कन्धः पीनायतभुजः कपिः ।
युवराजो महद्वाक्यमङ्गदस्तानथाब्रवीत् ॥ ६ ॥
शासनात् कपिसिंहस्य सर्वे वयमिहागताः ।
मासं पूर्णं विलगता नावबुध्याम वानराः ॥ ७ ॥
तस्मिन् व्यतीते काले तु सुग्रीवेण स्वयं कृते ।
प्रायोपवेशनं युक्तं सर्वेषां नो वनौकसां ॥ ८ ॥
सुग्रीवो बलवांस्तीक्ष्णः प्रकृत्या वानरेश्वरः ।
न क्षमिष्यति सोऽस्माकं व्यतिक्रममिमं प्रभुः ॥ ९ ॥

न हि क्षास्यति सुग्रीवो घोरं कर्म कृतं महत्।
सीताधिगमनेऽस्माभिः पापमेव करिष्यति ॥ १० ॥
प्राप्तादेशा वयं सर्वे साधु प्रायमुपास्महे।
त्यक्का पुत्रांश्च दारांश्च धनानि च गृहाणि च ॥ ११ ॥
न चासौ घातयेद्राजा पश्चात् प्रतिगतान् हि नः।
बधेनाप्रतिरूपेण मृत्युः श्रेयानिहैव नः ॥ १२ ॥
न चाहं यौवराज्ये वै सुग्रीवेणाभिषेचितः।
नरेन्द्रेणाभिषिक्तोऽहं रामेण विदितात्मना ॥ १३ ॥
स पूर्वबद्धवैरो मां दृष्ट्वा राजा व्यतिक्रमं।
घातयिष्यति तीक्ष्णेन दण्डेनातिचिराद्गतं ॥ १४ ॥
किं मे सुहृद्भिर्व्यसनं पश्यद्भिर्जीवितान्तकं।
इहैव प्रायमाशिष्ये रम्ये सागररोधसि ॥ १५ ॥
एतच्छ्रुत्वा तु करुणं युवराजस्य भाषितं।
ते सर्वे वानरश्रेष्ठा इदं वचनमब्रुवन् ॥ १६ ॥
तीक्ष्णः प्रकृत्या सुग्रीवः प्रियार्थी राघवस्य च।
अस्मानकृतकार्यांश्च तस्मिंश्च समये गते ॥ १७ ॥
अदृष्टायां च सीतायां दृष्ट्वास्मानागतान् प्रभुः।
राघवप्रियकामार्थी हनिष्यति न संशयः ॥ १८ ॥
आगांसि न क्षमन्ते हि प्रधानानां नराधिपाः।
प्रधानभूताश्च वयं सुग्रीवस्य सुसंमताः ॥ १९ ॥

श्रेयः प्रायोपगमनमीदृशे कार्य आगते ।
भयार्दितानां तेषां तु प्लवगानां महात्मनां ॥ २० ॥
उवाच वचनं तारस्तत्कालसदृशं हितं ।
विषादस्त्यज्यतामेष सर्वैरेव प्लवङ्गमैः ॥ २१ ॥
प्रविशामो विलं दुर्गं वयं यस्माद्विनिर्गताः ।
यदि वो रोचते वाक्यं सर्वेषां हरिपुङ्गवाः ॥ २२ ॥
क्रियतां किं विमर्षेण श्रेयो नः क्रियतामिदं ।
दुर्धर्षं च महच्चेदं बहुभक्ष्यं च वानराः ॥ २३ ॥
तत्र स्थांश्च न नः शक्ताः स्प्रष्टुं सेन्द्राश्च देवताः ।
किं पुनर्मानुषो रामो लक्ष्मणो वापि वीर्यवान् ।
सुग्रीवो वानरेन्द्रो वा तथा सर्वे वनौकसः ॥ २४ ॥

इदं हि मायाविहितं सुदुर्गमं
प्रभूतभक्ष्योदकभोज्यपेयं ।
ग्रहीतुमिन्द्रोऽपि न नोऽत्र शक्तः
सुग्रीवरामौ सहितौ न चापि ॥ २५ ॥
तदङ्गदस्यापि रुरोच वाक्यम्
ऊचुश्च सर्वे हरयः समेताः ।
यथा न हन्येमहि तद्विधानं
विधीयतां संशयमागताः स्मः ॥ २६ ॥

LIV.

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि ।
अथ मेने कृतं राज्यं हनूमानङ्गदेन हि ॥ १ ॥
बुद्ध्यासंशयया युक्तं पितुस्तेजोगुणान्वितं ।
चतुर्दशगुणं मेने हनूमान् बालिनः सुतं ॥ २ ॥
आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः ।
शशिनं शुक्लपक्षादौ वर्धमानमिवौजसा ॥ ३ ॥
बृहस्पतिसमं बुद्ध्या विक्रमेण समं पितुः ।
शुश्रूषमाणं तारस्य यथा शक्रं बृहस्पतेः ॥ ४ ॥
भर्तुः कार्ये पराक्रान्तः सर्वशास्त्रविशारदः ।
अभिसंधातुमारेभे हनूमानङ्गदं ततः ॥ ५ ॥
स चतुर्णामुपायानां तृतीयमनुवर्तयन् ।
भेदयामास तान् सर्वान् वानरान् वाक्यसंपदा ॥ ६ ॥
तेषु सर्वेषु भिन्नेषु ततोऽभेदयदङ्गदं ।
भीषणैर्बहुभिर्वाक्यैः शिक्षार्थं ह्यङ्गदं च तैः ॥ ७ ॥
सामर्थ्ये त्वं पितुस्तुल्यो युधि मल्लक्रियाविधौ ।
दृढं धारयितुं शक्तः कपिराज्यं यथा पिता ॥ ८ ॥
नित्यमस्थिरचित्तास्तु हरयो हरिसत्तम ।
न वस्तुं विषहिष्यन्ति पुत्रदारैर्विना त्वया ॥ ९ ॥

न ते त्वामनुरज्येरन् प्रत्यक्षं प्रवदामि ते ।
यथाहं रामसुग्रीवौ लक्ष्मणश्च पितुस्तव ॥ १० ॥
न चाहं न च ते सर्वे सामदानविभेदनैः ।
न दण्डैर्न युधा शक्याः सुग्रीवादपकर्षितुं ॥ ११ ॥
न विग्रहं समं प्राहुर्दुर्बलस्य बलीयसा ।
आत्मक्षयकरं तस्मान्न विगृह्णीत दुर्बलः ॥ १२ ॥
यां चेमां मन्यसे वीर गुहां दुर्गसमाश्रयां ।
एषा लक्ष्मणबाणानामीषत्कार्या विदारणे ॥ १३ ॥
स्तोकं हि कृतमिन्द्रेण वज्रेणात्र विदारणं ।
लक्ष्मणस्तु शितैर्बाणैर्भिन्द्यात् पत्रपुटं यथा ॥ १४ ॥
एकैवेन्द्राशनिर्ज्ञेया यया दुर्गं विदारितं ।
लक्ष्मणस्य तु नाराचा बहुशः सन्ति तादृशाः ॥ १५ ॥
यदि कर्ता भवानेवं विलेऽस्मिन्नभिसंश्रयं ।
ततस्त्वां हरयः सर्वे त्यक्ष्यन्ति कृतनिश्चयाः ॥ १६ ॥
स्मरन्तः पुत्रदाराणां नित्योद्विग्ना बुभुक्षिताः ।
खेदिता दुःखिताश्चैव त्वां करिष्यन्ति पृष्ठतः ॥ १७ ॥
स विहीनः सुहृद्भिश्च हितकामैश्च बन्धुभिः ।
तृणादपि भयोद्विग्नः स्पन्दमानस्त्रसिष्यसि ॥ १८ ॥
न तु जातु न हिंस्युस्त्वां रामलक्ष्मणसायकाः ।
अपवृत्ता महावेगा यदि त्वं नागमिष्यसि ॥ १९ ॥

अद्य त्वेतस्य कालस्य साग्रं वर्षशतत्रयं ।
देशकालप्रतीक्षोऽस्मि हृदि कृत्वा मुनेर्वचः ॥ २० ॥
महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे ।
स मां दहति संतापो वितर्कैर्बहुभिर्वृतं ॥ २१ ॥
उत्थितां महतीं बुद्धिं मरणे संहराम्यहं ।
श्रुतैस्तैः शमयन् वाक्यैरग्निमम्बुघटैरिव ॥ २२ ॥
सत्यार्था निश्चिता बुद्धिर्धर्मार्थं वानरर्षभाः ।
सा मे विनयते दुःखं दीपस्येव शिखा तमः ॥ २३ ॥
भक्ष्यैस्तु विविधैस्तैस्तैः पुत्रो मामिह पुष्यति ।
एकं कालं जनन्यर्थे हिमवन्तं जगाम सः ॥ २४ ॥
पक्षाभ्यामावृतस्तेन रावणो मैथिलीं हरन् ।
संप्रधार्य ममावस्थां धर्मापेक्षी न युद्धवान् ॥ २५ ॥
जानता तु मया वीर्यं रावणस्य दुरात्मनः ।
पुत्रः संतर्जितो वाग्भिर्न त्राता मैथिली कथं ॥ २६ ॥
तस्या विलपितं श्रुत्वा तौ च सीताविनाकृतौ ।
न मे दशरथस्नेहात् पुत्रेणोत्पादितं प्रियं ॥ २७ ॥
इत्येवममृतास्वादं गृध्रराजसमीरितं ।
निशम्य वचनं हृष्टास्ते भूयः प्लवगर्षभाः ॥ २८ ॥
जाम्बवांश्च हरिश्रेष्ठः सह सर्वैः प्लवङ्गमैः ।
भूतलात् सहसोत्पत्य गृध्रराजमथाब्रवीत् ॥ २९ ॥

कथं पुत्रेण ते दृष्टा ह्रियमाणायतेक्षणा ।
सर्वमाख्याहि भद्रं ते गतिर्भव वनौकसां ॥ ३० ॥
स हरीन् प्रतिसंहृष्टान् सीताश्रुतिसमाहितान् ।
पुनराश्वासयन् पक्षी वचनं चाब्रवीदिदं ॥ ३१ ॥
श्रूयतां हन्त वैदेह्या यथा मे हरणं श्रुतं ।
पुत्रेण हीदमाख्यातं महावीर्येण धीमता ॥ ३२ ॥
अहमस्मिन् गिरौ दुर्गे योजनायतविस्तरे ।
चिरात् प्रपतितो वृद्धः क्षीणवीर्यपराक्रमः ॥ ३३ ॥
स मां गुरुहितः पुत्रः सुपार्श्वस्तु गुणान्वितः ।
आहारेण यथाकालं प्रीणाति पततां वरः ॥ ३४ ॥
तीक्ष्णकोपास्तु गन्धर्वास्तीक्ष्णकोपा भुजङ्गमाः ।
मृगाणां च भयं तीक्ष्णमस्माकं क्षुद्भयं तथा ॥ ३५ ॥
स कदाचित् क्षुधार्त्तस्य ममाहाराभिकाङ्क्षिणः ।
गतसूर्येऽहनि प्राप्तो मम पुत्रो निरामिषः ॥ ३६ ॥
स मया क्रुद्धभावेन कोपाच्च परिभर्त्सितः ।
क्षुत्पिपासाभिभूतेन कुमारः पतगोत्तमः ॥ ३७ ॥
स ममाहारसंरोधात् पीडितः प्रीतिवर्धनः ।
अनुमान्य यथातथ्यमिदं वचनमब्रवीत् ॥ ३८ ॥
अहं तात यथाकालमाहारार्थी खमुत्प्लुतः ।
महेन्द्रस्य गिरेर्द्वारं महदावृत्य विष्ठितः ॥ ३९ ॥

अस्माभिस्तु गतं सार्द्धं विनीतवदुपस्थितं ।
आनुपूर्व्या स सुग्रीवो राज्ये त्वां स्थापयिष्यति ॥२०॥
धर्मकामः पितृव्यस्ते धर्मात्मा संशितव्रतः ।
शुचिः सत्यप्रतिज्ञश्च न स यातं न सान्त्वयेत् ॥२१॥
प्रियकामश्च ते मातुस्तदर्थं चास्य जीवितं ।
तस्यापत्यं न चास्त्यन्यत् तस्मादङ्गद गम्यतां ॥२२॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे तारवाक्यं नाम
त्रिपञ्चाशः सर्गः—हनूमद्वाक्यं नाम
चतुःपञ्चाशः सर्गः ॥

LV.

श्रुत्वा तु हनुमद्वाक्यं प्रसृतं धर्मसंहितं ।
स्वामिसत्कारसंयुक्तमङ्गदः प्रत्युवाच ह ॥ १ ॥
स्थैर्यं धर्मात्मता शौचमानृशंस्यमथार्जवं ।
विक्रमश्चैव धैर्यं च सुग्रीवे नोपपद्यते ॥ २ ॥
कथं स धर्मं जानाति भ्रातरं पूर्वजं हि यः ।
अश्मभिः प्रत्यरौत्सीद्धि ह्यभानुपतने बिले ॥ ३ ॥
भ्रातुर्ज्येष्ठस्य यः क्रुद्धो जीवतो महिषीं प्रियां ।
धर्मतो मातरमिव स्वीकरोति जुगुप्सितः ॥ ४ ॥
सखा पाणिगृहीतश्च कृतकर्मा महायशाः ।
न स्मृतो राघवो येन स कस्य सुकृतं स्मरेत् ॥ ५ ॥
लक्ष्मणस्य भयाद्येन नाधर्मभयभीरुणा ।
आरब्धा मार्गितुं सीता धर्मस्तत्र कथं भवेत् ॥ ६ ॥
तस्मिन् पापे कृतघ्ने च स्मृतिहीने चलात्मनि ।
विश्वसेत् कः पुमान् प्राज्ञस्तत्कुलीनो जिजीविषुः ॥ ७ ॥
राजपुत्रं प्रतिष्ठाप्य सगुणं वापि निर्गुणं ।
कथं शत्रुः कुलीनं मां सुग्रीवो जीवयिष्यति ॥ ८ ॥
भिन्नमन्त्रो विरुद्धश्च हीनः शक्त्या कथं ह्यहं ।
किष्किन्धां प्राप्य जीवेयं गतायुरिव सज्वरं ॥ ९ ॥

उपांशुदण्डेन हि मां बन्धनेनावसादयेत् ।
शठः क्रूरः कृतघ्नश्च सुग्रीवो राज्यकारणात् ॥ १० ॥
बन्धनान्मरणाच्छ्रेय इह प्रायोपवेशनं ।
अनुजानीत मां सर्वे गृहान् गच्छत वानराः ॥ ११ ॥
भवन्तः प्रतिगच्छन्तु न गमिष्याम्यहं पुनः ।
इहैव प्रायमाशिष्ये श्रेयो मरणमेव मे ॥ १२ ॥
अभिवादनपूर्वं तु सुग्रीवः प्लवगेश्वरः ।
वाच्यस्ततो यवीयान् मे कुशलं वचनान्मम ॥ १३ ॥
आरोग्यपूर्वं कुशलं वाच्या माता रुमा तथा ।
मातरं चापि मे तारामाश्वासयितुमर्हथ ॥ १४ ॥
प्रकृत्या प्रियपुत्रा सा सानुक्रोशा तपस्विनी ।
विनष्टं मामिह श्रुत्वा व्यक्तं त्यक्ष्यति जीवितं ॥ १५ ॥
एतावदुक्त्वा वचनं वृद्धांस्तत्राभिवाद्य च ।
संविवेशाङ्गदो भूमौ रुदन् दर्भेषु दुर्मनाः ॥ १६ ॥
तस्य श्रुत्वा वचस्तत्र करुणं वानरर्षभाः ।
नयनेभ्यस्तु ससृजुर्नेत्रजं वारि दुःखिताः ॥ १७ ॥
सुग्रीवं चैव निन्दन्तः प्रशंसन्तश्च बालिनं ।
परिवार्याङ्गदं सर्वे व्यवस्य प्रायमाशितुं ॥ १८ ॥
तद्वाक्यं बालिपुत्रस्य विज्ञाय प्लवगर्षभाः ।
उपस्पृश्योदकं सर्वे प्राङ्मुखाः समुपाविशन् ॥ १९ ॥

दक्षिणाग्रेषु दर्भेषु कृत्वा चोत्तरतः शिरः ।
तमेवानुमरिष्यन्तः सर्वे संविविशुर्भुवि ॥२०॥

स संविशद्भिर्बहुभिर्महीधरो
महाद्रिशृङ्गप्रतिमैः प्लवङ्गमैः ।
बभूव संनादितनिर्झरान्तरो
भृशं नदद्भिर्जलदैरिवाम्बरः ॥२१॥

इत्यार्षे रामायणे किष्किन्धाकाण्डे प्रायोपवेशनारम्भो
नाम पञ्चपञ्चाशः सर्गः ॥

LVI.

उपविष्टास्तु ते सर्वे तस्मिन् प्रायं धराधरे ।
हरयो गृध्रराजश्च तं देशं समुपास्थितः ॥ १ ॥
सम्पातिर्नाम नाम्ना तु दीर्घजीवी द्विजोत्तमः ।
जटायुषोऽग्रजो भ्राता प्रख्यातबलपौरुषः ॥ २ ॥
कन्दरादभिनिष्क्रम्य स विन्ध्यस्य महागिरेः ।
उपविष्टान् हरीन् दृष्ट्वा प्रीतो वचनमब्रवीत् ॥ ३ ॥
विधिः किल परे लोके विधानेनोपतिष्ठते ।
यथेदं विहितं भक्ष्यं चिरान्मे समुपस्थितं ॥ ४ ॥
वरं वराणां खादिष्ये वानराणां मृतं मृतं ।
एवमुक्त्वा तु सम्पाती तानवैक्षत वानरान् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा गृध्रराजस्य दारुणं ।
अङ्गदः परमत्रस्तो हनूमन्तमुवाच ह ॥ ६ ॥
पश्य सीताप्रणाशेन साक्षाद्वैवस्वतो यमः ।
इमं देशमनुप्राप्तो वानराणां विपत्तये ॥ ७ ॥
रामस्य न कृतं कार्यं न राज्ञो वचनं कृतं ।
हरीणामियमज्ञाता विपत्तिः समुपागता ॥ ८ ॥
वैदेह्यां ह्रियमाणायां कृतं कर्म जटायुषा ।
गृध्रराज्ञा जनस्थाने श्रुतं वस्तन्न संशयः ॥ ९ ॥

रावणेन नृशंसेन स वै प्राणैर्वियोजितः ।
एवं सर्वाणि भुतानि तिर्यग्योनिगतान्यपि ॥ १० ॥
प्रियं कुर्वन्ति रामस्य त्यक्त्वा प्राणान् वयं यथा ।
राघवार्थे पराक्रान्तास्तदर्थे त्यक्तजीविताः ॥ ११ ॥
कान्ताराणि प्रपन्नाः स्म न च पश्याम मैथिलीं ।
सुखितो गृध्रराजस्तु रावणेन हतो रणे ॥ १२ ॥
मुक्तश्च सुग्रीवभयाद्गतश्च गतिमुत्तमां ।
पितुर्मम विनाशाय जहार जनकात्मजां ॥ १३ ॥
राक्षसापसदः पापः पौलस्त्यकुलपांसनः ।
मृतान् मृतान् नो गृध्रोऽयं भक्षयिष्यति वानरान् ॥ १४ ॥
जटायुषो बालिनश्च नाशाद्दशरथस्य च ।
हरणे चापि वैदेह्याः संशयं वानरा गताः ॥ १५ ॥
सुदुष्करं कृतं कर्म कैकेय्या धर्मगर्हितं ।
यया समस्तं निहतं कुलमात्मा यशो वयं ॥ १६ ॥
कैकेय्या हि कृते पापे शोकेन स महाद्युतिः ।
तथा क्षितिपतिः प्रेतः पुत्रं संप्रेष्य दण्डकं ॥ १७ ॥
उपकारं तु कुर्वन्ति साधवः सज्जने सदा ।
धन्यः स गृध्राधिपतिर्जटायुः परवीरहा ॥ १८ ॥
यो राघवार्थे निहतो रावणेन पराक्रमात् ।
एतच्छ्रुत्वा तु वचनमङ्गदस्य मुखाच्च्युतं ॥ १९ ॥

भ्रातृस्नेहेन सम्पाती सहसा व्यथितोऽभवत् ।
तांश्च प्रायमुपाविष्टांस्तदा गिरिवरे स्थितः ॥ २० ॥
अब्रवीद्वचनं गृध्रस्तीक्ष्णतुण्डो दुरासदः ।
जटायुषं को वदति प्राणैरिष्टतरं मम ॥ २१ ॥
तदिच्छेयमहं श्रोतुं विनाशं वानरर्षभाः ।
भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः ॥ २२ ॥
कथं जटायुर्निहतः कश्च रामो जटायुषः ।
कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः ॥ २३ ॥
पूर्वजोऽहं जटायुर्मे यवीयान् हरिपुङ्गवाः ।
हतः केन कथं कुत्र कस्माद्वा प्रायमास्यते ॥ २४ ॥
यवीयसो गुणाढ्यस्य श्लाघनीयस्य विक्रमैः ।
नामधेयमिदं भ्रातुश्चिरादद्य मया श्रुतं ॥ २५ ॥
तस्येष्टस्य मम भ्रातुः सखा दशरथो नृपः ।
यस्य रामः प्रियः पुत्रो ज्येष्ठः श्रेष्ठश्च सद्गुणैः ॥ २६ ॥
वनं प्रविष्टः स कथं सीतया सह भार्यया ।
पृष्ठतोऽनुगतो भ्रात्रा लक्ष्मणेन च वीर्यवान् ॥ २७ ॥
कथं चापि हृता सीता केन वा हरिपुङ्गवाः ।
केन वा कारणेनैतत् सर्वमाख्यातुमर्हथ ॥ २८ ॥
सूर्यांशुदग्धपक्षोऽहं न समर्थो विसर्पणे ।
इच्छेयमस्माद्गिर्यग्राद्भवद्भिरवतारणं ॥ २९ ॥

LVII.

शोकाकृष्टस्वरमपि श्रुत्वा ते हरियूथपाः ।
श्रद्दधुर्नैव तद्वाक्यं कर्मणा तेन शङ्किताः ॥ १ ॥
ते तु प्रायमुपाविष्टाश्चिन्तयन्तोऽवनीमुखाः ।
चक्रुर्बुद्धिमयं पापः सर्वान् नो भक्षयिष्यति ॥ २ ॥
सर्वथा प्रायमासीनान् यदि नो भक्षयिष्यति ।
कृतकृत्या भविष्यामः क्षिप्रं सिद्धिमितो गताः ॥ ३ ॥
एतां बुद्धिं तदा कृत्वा सर्वे वानरपुङ्गवाः ।
ततोऽवतारयामासुर्गिरिशृङ्गात् खगोत्तमं ॥ ४ ॥
अवतार्य ततश्चैनमङ्गदो वाक्यमब्रवीत् ।
प्राग् बभूवर्क्षराजो वै वानरेन्द्रः प्रतापवान् ॥ ५ ॥
ममार्यकः पक्षिवर धार्मिकः शुचिरात्मवान् ।
तस्यात्मजौ महात्मानौ बलवन्तौ बभूवतुः ॥ ६ ॥
बाली च हरिशार्दूलः सुग्रीवश्च परंतपः ।
लोके विश्रुतकर्माणौ राजा चासीत् पिता मम ॥ ७ ॥
राजा सर्वस्य लोकस्य क्षत्रियाणां महारथः ।
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकं वनं ॥ ८ ॥
लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ।
पितुर्निर्देशान्निष्क्रान्तो धर्मपन्थानमास्थितः ॥ ९ ॥

ब्राह्मणद्वेषिणा नित्यं सर्वपापातिसिद्धिना ।
तस्य भार्या जनस्थानाद्रावणेन हृता हलात् ॥१०॥
रामस्य च पितुर्मित्रं जटायुर्नाम धार्मिकः ।
ददर्श नीयमानां तां राक्षसेन स मैथिलीं ॥११॥
रावणं विरथं कृत्वा मोचयित्वा च मैथिलीं ।
परिश्रान्तश्च वृद्धश्च रावणेन ततो हतः ॥१२॥
एवं गृध्रो हतस्तेन रावणेन बलीयसा ।
मित्रार्थमभिसंतप्तः परं पौरुषमास्थितः ॥१३॥
सत्कृतश्चापि रामेण गतः स्वर्गं न संशयः ।
एवं रामप्रयुक्ताः स्मो मार्गमाणास्ततस्ततः ॥१४॥
वैदेहीं नाधिगच्छामो निशि सूर्यप्रभामिव ।
एवमिक्ष्वाकुनाथस्य वसतः कानने प्रियां ॥१५॥
जहार रावणो भार्यां हत्वा गृध्रं जटायुषं ।
तव भ्रातृनिहन्तारं रामभार्यापहारिणं ॥१६॥
निहन्युः कपयः शीघ्रं जानीयुर्यदि यत्र सः ।
ततो मम पितृव्येण सुग्रीवेण महात्मना ॥१७॥
चकार राघवः सख्यमबधीत् पितरं च मे ।
मम पित्रा विरुद्धं तु सुग्रीवं सचिवैः सह ॥१८॥
निहत्य बालिनं रामस्ततस्तमभिषिक्तवान् ।
स राज्ये स्थापितस्तेन सुग्रीवो वानराधिपः ॥१९॥

राज्ञा वानरमुख्यानां येन प्रस्थापिता वयं ।
ते वयं दण्डकारण्यं विचित्य सुसमाहिताः ॥ २० ॥
अविज्ञानात् प्रविष्टाः स्म धरण्यां विवृतं विलं ।
मयस्य मायाविहितं विलं तच्च विचिन्वतां ॥ २१ ॥
व्यतीतस्तत्र नो मासो राज्ञा यः समयः कृतः ।
तेन स्म कपिराजेन प्रेषिताः सर्वतो दिशं ॥ २२ ॥
कृतां संस्थामतिक्रम्य भयेन प्रायमास्महे ।
अस्मदीयैः शरीरैस्त्वं कुरु कार्यं यथेप्सितं ॥ २३ ॥
सुग्रीवे हि भृशं क्रुद्धे राघवे लक्ष्मणे तथा ।
गतानामपि सर्वेषां नास्ति किञ्चन जीवितं ॥ २४ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे सम्पातिदर्शनं
नाम षट्पञ्चाशः सर्गः — अङ्गदवाक्यं
नाम सप्तपञ्चाशः सर्गः ॥

LVIII.

इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः ।
सबाष्पं वानरान् गृध्रः प्रत्युवाच महामतिः ॥ १ ॥
यवीयान् मम स भ्राता जटायुर्नाम वानराः ।
यमाख्यात हतं संख्ये रावणेन दुरात्मना ॥ २ ॥
वृद्धभावादपक्षत्वं शृणवंस्तन् मर्षये ।
न हि मे शक्तिरद्यास्ति भ्रातुर्वधविचारणे ॥ ३ ॥
पुरा वृत्रवधे वृत्ते स चाहं च जयैषिणौ ।
तरुणौ बलवन्तौ च सहर्षाद्गगनप्लुतौ ॥ ४ ॥
उदयादुदितं दीप्तं ज्वालापिण्डसमप्रभं ।
आदित्यमनुसंयातौ ज्वलन्तं रश्मिमालिनं ॥ ५ ॥
अहं चैव जटायुश्च जवेनोत्पतितौ भृशं ।
मध्यं प्राप्ते ततः सूर्ये जटायुः सोऽवसीदत ॥ ६ ॥
तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितं ।
पक्षाभ्यां छादयां चक्रे स्नेहात् परमविह्वलः ॥ ७ ॥
निर्दग्धपक्षः पतितः पर्वतेऽस्मिन् पराजितः ।
अस्मिन् विन्ध्ये न तु भ्रातुः प्रवृत्तिमुपलक्षये ॥ ८ ॥
सुदीर्घस्याथ कालस्य प्रवृत्तिः कथिता हि नः ।
अब्रवीत् पुनरेवेदं बाष्पसंदिग्धया गिरा ॥ ९ ॥

न भयं कपिवीराणां विद्यते मत्सकाशतः ।
भ्रातुर्जटायुषो मृत्युं श्रुत्वा शोकेन विह्वलः ॥ १० ॥
युष्मान् समुपसर्पामि प्रवृत्त्यर्थं यवीयसः ।
तदेतदुपलब्धं मे तस्य वीरस्य नैधनं ॥ ११ ॥
एवमुक्तो जटायोस्तु भ्रात्रा तत्त्वार्थदर्शिना ।
युवराजोऽङ्गदो भूयः प्रोवाच वचनं हरिः ॥ १२ ॥
जटायुषः प्रियभ्रातुः श्रुतं ते ब्रुवतो मम ।
आचक्ष्व यदि जानासि भवनं तस्य रक्षसः ॥ १३ ॥
अदीर्घदर्शिनं रौद्रं रावणं राक्षसाधमं ।
इहाभ्यासे विदूरे वा यदि जानासि शंस नः ॥ १४ ॥
ततोऽब्रवीन्महातेजाः सम्पाती गृध्रसत्तमः ।
आत्मानुरूपं वचनं वानरान् संप्रहर्षयन् ॥ १५ ॥
निर्दग्धपक्षो वृद्धोऽहं गतवीर्यश्च वानराः ।
वाङ्मात्रेण तु रामस्य करिष्ये कार्यमुत्तमं ॥ १६ ॥
जानामि गरुडाज्जातो विष्णोस्त्रीन् विक्रमानपि ।
महासुरविमर्दं च अमृतस्य च मन्थनं ॥ १७ ॥
रामस्य यदिदं कृत्यं कृत्यं तत् परमं मम ।
जरया तु हृतं तेजः प्राणाश्च शिथिला मम ॥ १८ ॥
तरुणी रूपसंपन्ना वराभरणभूषिता ।
ह्रियमाणा मया दृष्टा रावणेन दुरात्मना ॥ १९ ॥

क्रोशन्ती राम रामेति करुणं लक्ष्मणेति च ।
भूषणान्यपविध्यन्ती गात्राणि च विधुन्वती ॥ २० ॥
सूर्यप्रभेव शैलाग्रे तस्याः कौषेयमुत्तमं ।
असितं राक्षसे भाति महामेघे यथा तडित् ॥ २१ ॥
अहं तु सीतां तां मन्ये रामस्य परिकीर्त्तनात् ।
श्रूयतां चापि वक्ष्यामि निलयं तस्य रक्षसः ॥ २२ ॥
पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च ।
अध्यास्ते नगरीं लङ्कां रावणो राक्षसाधिपः ॥ २३ ॥
इतो द्वीपः समुद्रस्य समग्रे शतयोजने ।
तस्मिन् लङ्का पुरी रम्या निर्मिता विश्वकर्मणा ॥ २४ ॥
तस्यां वसति वैदेही दीना कौषेयवासिनी ।
रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ॥ २५ ॥
जनकस्य सुतां राज्ञस्तस्यां द्रक्ष्यथ मैथिलीं ।
लङ्कायामभिगुप्तायां सागरेण समन्ततः ॥ २६ ॥
संप्राप्य सागरस्यान्तं संपूर्णं शतयोजनं ।
विक्रम्य दक्षिणं कूलं ततो द्रक्ष्यथ वानराः ॥ २७ ॥
ते यूयं त्वरिताः सर्वे विक्रमध्वं प्लवङ्गमाः ।
ज्ञानेन खलु पश्यामि दृष्ट्वा प्रत्यागमिष्यथ ॥ २८ ॥
आद्यः पन्थाः पतङ्गानां ये च धान्योपजीविनः ।
द्वितीयो बलिभोक्तॄणां ये च पुष्पफले रताः ॥ २९ ॥

भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह ।
श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमं ॥ ३० ॥
बलवीर्योपपन्नानां रूपयौवनशालिनां ।
षष्ठो मार्गस्तु हंसानां वैनतेयगतिः परा ॥ ३१ ॥
वैनतेयाच्च नो जन्म पूर्वेषां वानरर्षभाः ।
गर्हितं तु कृतं कर्म येन स्मः पिशिताशनाः ॥ ३२ ॥
इहस्थोऽपि हि पश्यामि रावणं तां च मैथिलीं ।
अस्माकं ह्यतिसौपर्णं दिव्यं चक्षुर्बलं महत् ॥ ३३ ॥
तस्मादाहारलोभेन निसर्गेण च वानराः ।
आयोजनशतात् साग्रात् पश्यामो वयमामिषं ॥ ३४ ॥
अस्माकं विहिता दृष्टिर्निसर्गेण विदूरतः ।
विहिता पादमूले तु वृत्तिश्चरणयोधिनां ॥ ३५ ॥
उपायो दृश्यतां कश्चिल्लङ्घने लवणाम्भसः ।
अधिगम्य च वैदेहीं समृद्धार्था भविष्यथ ॥ ३६ ॥
भवद्भिर्नेतुमिच्छामि आत्मानं वरुणालयं ।
प्रदास्याम्युदकं भ्रातुः स्वर्गतस्य महात्मनः ॥ ३७ ॥
ते नीत्वा तु समं देशं तीरे नदनदीपतेः ।
निर्दग्धपक्षं सम्पातिमवतार्याथ सागरं ॥ ३८ ॥
प्रत्यानीय पुनश्चापि प्रत्यारोप्य कृतोदकं ।
बभूवुर्वानरा हृष्टाः प्रवृत्तिमुपलभ्य ते ॥ ३९ ॥

LIX.

ततः कृतोदकं स्नातं तं गृध्रं हरियूथपाः ।
उपविष्टं गिरितटे परिवार्योपतस्थिरे ॥ १ ॥
ततोऽङ्गदमुपासीनं निशम्य हरिभिर्वृतं ।
तन्निरुप्रत्ययो हर्षात् सम्पातिः पुनरब्रवीत् ॥ २ ॥
कृत्वा निःशब्दमेकाग्राः शृणुत प्लवगर्षभाः ।
तथ्यं संकीर्तयिष्यामि येन जानामि मैथिलीं ॥ ३ ॥
अस्य विन्ध्यस्य शिखरे पुरास्मि पतितो दिवः ।
दाहदुःखपरीताङ्गो निर्दग्धः सूर्यरश्मिभिः ॥ ४ ॥
लब्धसंज्ञस्तु षड्रात्रात् सरुजो विह्वलन्निव ।
वीक्षमाणो दिशः सर्वा नाभिजानामि तत्त्वतः ॥ ५ ॥
अथेमान् सागरोद्देशान् नदीः शैलान् वनानि च ।
सरांसि निर्झरांश्चैव पश्यतः स्मृतिराविशत् ॥ ६ ॥
हृष्टपक्षिगणाकीर्णः कन्दरोदककूपवान् ।
दक्षिणस्योदधेः कूले विन्ध्योऽयमिति मे मतिः ॥ ७ ॥
अस्ति चात्राश्रमः पुण्यः सुरैरपि सुपूजितः ।
ऋषिर्निशाकरो नाम तस्मिन्नुग्रतपा अभूत् ॥ ८ ॥
अष्टौ वर्षसहस्राणि तेनास्मिन्नुषितं गिरौ ।
स्वर्गतस्य शतं त्वेकं द्वे शते वसतो मम ॥ ९ ॥

अवतीर्य च शैलाग्रात् कृच्छ्रेण विषमाच्छनैः ।
तीक्ष्णदर्भां वसुमतीं विचरामि सुदुःखितः ॥ १० ॥
तमृषिं द्रष्टुकामोऽस्मि प्रयत्नं कृतवान् भृशं ।
जटायुषा मया पूर्वं बहुशोऽभिगतो हि सः ॥ ११ ॥
अभ्यासे चाश्रमात् पुण्याद्ववुर्वाताः सुगन्धिनः ।
वृक्षो नापुष्पितः कश्चिदफलो वात्र दृश्यते ॥ १२ ॥
उत्पत्य चाश्रमद्वारि वृक्षमूलमुपाश्रितः ।
द्रष्टुकामः प्रतीक्षे तं भगवन्तं निशाकरं ॥ १३ ॥
अथ पश्यामि दूरस्थमृषिं ज्वलिततेजसं ।
कृताभिषेकं दुर्धर्षमुपावृत्तमुपान्तिकात् ॥ १४ ॥
तमृक्षाः सृमरा व्याघ्राः सिंहा नागाः सरीसृपाः ।
परिवार्यानुगच्छन्ति धातारमिव देहिनः ॥ १५ ॥
संप्राप्तं तमृषिं दृष्ट्वा दिग्भ्यस्ते प्रययुस्ततः ।
प्रविष्टस्येव भवनं राज्ञः सामात्यकं बलं ॥ १६ ॥
ऋषिर्दृष्ट्वा तु मां तूष्णीं प्रविवेशाश्रमं प्रभुः ।
स मुहूर्त्ताद्विनिष्क्रम्य ततः कार्यं स पृष्टवान् ॥ १७ ॥
वर्णविवर्णमालोक्य पक्षयोश्च पराजयं ।
नाभिजानामि पूर्वं त्वां पश्चात् स्मृत्वाहमागतः ॥ १८ ॥
तव विह्वलतां दृष्ट्वा रोम्णां न ज्ञातवानहं ।
अग्निदग्धाविमौ पक्षौ शरीरं च व्रणावृतं ॥ १९ ॥

गृध्रौ द्वौ दृष्टपूर्वौ मे वायुवेगसमौ जवे ।
गृध्राणां चैव राजानौ भ्रातरौ कालरूपिणौ ॥ २० ॥
तयोर्ज्येष्ठश्च सम्पाती जटायुरनुजश्च रु ।
मानुषं रूपमास्थाय पादौ जगृहतुर्मम ॥ २१ ॥
तयोस्तुल्यं न पश्यामि रूपेण च बलेन च ।
विचिन्त्य च जगत् कृत्स्नं तयोस्तुल्यो न विद्यते ॥ २२ ॥
कस्ते व्याधिः समुत्पन्नः पक्षयोः पतनं कथं ।
दण्डो वा पातितः केन तथ्यमिच्छामि वेदितुं ॥ २३ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे वार्त्तोपलब्धिर्नाम
अष्टापञ्चाशः सर्गः — निशाकरमुनिसंकीर्तनं
नाम नवपञ्चाशः सर्गः ॥

LX.

एवमुक्तस्त्वहं तेन तदा धर्मात्मना वचः ।
अनुजं संस्मरन् किञ्चिद्वाष्पपूर्णमुखोऽभवं ॥ १ ॥
धारयित्वाश्रुवेगं तु भ्रातृस्नेहादुपस्थितं ।
निवेदयामास तदा महर्षिं संकृताञ्जलिः ॥ २ ॥
भगवन् प्रतिरुद्धत्वाल्लज्जया चापि नामितः ।
तद्याकर्तुं न शक्नोमि मुखं वाष्पो रुणद्धि मे ॥ ३ ॥
सम्पातिनं मां भगवन् विद्धि दुष्कृतकारिणं ।
भ्रातरं ज्येष्ठमिष्टस्य वीरस्य च जटायुषः ॥ ४ ॥
कारणं चाभिधास्यामि येन पक्षाविमौ मम ।
निर्दग्धौ च विरूपौ च भगवन् श्रोतुमर्हसि ॥ ५ ॥
अहं चैव जटायुश्च संहृष्टौ दर्पमोहितौ ।
वीर्यादुत्पतितौ वेगाज्जिज्ञासन्तौ परां गतिं ॥ ६ ॥
विन्ध्यस्याग्रे पणं कृत्वा मुनीनामग्रतः पुरा ।
पणेषु राज्यमुद्दिश्य कालस्य वशमागतौ ॥ ७ ॥
रविरस्यानुयातव्यो यावदस्तमथोदयं ।
अथ वायुपथं प्राप्य पश्यावः पृथिवीतले ॥ ८ ॥
रथचक्रप्रमाणानि नगराणि क्वचित् क्वचित् ।
क्वचिद्वादित्रनिर्घोषान् ब्रह्मघोषान् क्वचित् क्वचित् ॥ ९ ॥

तथैवाप्सरसो बह्वीः पश्यावो मृष्टकुण्डलाः ।
जिज्ञासन्तावुभौ वीर्यमन्योन्यस्यान्तरैषिणौ ॥ १० ॥
तूर्णमुत्पत्य चाकाशमादित्यपथमास्थितौ ।
आवमालोकयन्तौ तु वेगमुत्तममागतौ ॥ ११ ॥
पृथिवी च तदा मन्ये नवशाद्वलशोभिता ।
उत्पलैरिव संछन्ना दृश्यते स्म शिलोच्चयैः ॥ १२ ॥
आपगाश्च प्रदृश्यन्ते लाङ्गलस्य गतिर्यथा ।
हिमवांश्चैव विन्ध्यश्च मेरुश्चाप्यर्णवावृताः ॥ १३ ॥
भूतले संप्रकाशन्ते नागा इव शिलातले ।
तीव्रः खेदश्च दाहश्च तदा ग्लानिश्च या परा ॥ १४ ॥
समाविवेश मोहश्च भयं चासीत् तदावयोः ।
दिग्न विज्ञायते पूर्वा न कौवेरी न पश्चिमा ॥ १५ ॥
न याम्या नापि विदिशः काश्चिदर्कप्रतापिताः ।
युगान्तनियते काले पावकेन यथा भवेत् ॥ १६ ॥
अग्निराशिरिवाकाशे भास्करः सर्वलोहितः ।
अप्रमेयवपुस्तस्य नातिव्यक्तं प्रकाशते ॥ १७ ॥
यत्नेन महता व्योम्नि मया समवलोकितः ।
तुल्यः पृथ्वीप्रमाणेन भास्करः प्रतिभाति मे ॥ १८ ॥
जटायुर्मामनादृत्य पपातावाङ्मुखस्तदा ।
तं दृष्ट्वा तूर्णमाकाशादात्मानं मुक्तवानहं ॥ १९ ॥

पक्षाभ्यां च मया गुप्तो जटायुर्न व्यदह्यत ।
प्रमादाहं भृशनिर्दग्धोऽपतं वायुपथाच्च्युतः ॥ २० ॥
अहं तु पतितो विन्ध्ये दग्धपक्षो जडीकृतः ।
अश्रौषं पतितं चाहं जनस्थाने जटायुषं ॥ २१ ॥
पुण्यानामवशेषेण निमग्नो नास्मि सागरे ।
आकाशे वा मृतो नास्मि विषमे वा शिलोच्चये ॥ २२ ॥
राज्येन हीनो भ्रात्रा च पक्षाभ्यां विक्रमेण च ।
सर्वथा मर्तुमिच्छामि पतिष्यामि गिरेस्तटात् ॥ २३ ॥
को हि मे जीवितेनार्थो विपक्षस्याद्य पक्षिणः ।
परैः संचरमाणस्य काष्ठलोष्टसधर्मिणः ॥ २४ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे सम्पातिवाक्यं
नाम षष्टितमः सर्गः ॥

LXI.

एवमुक्त्वा मुनिश्रेष्ठं प्ररुदन् दुःखितो भृशं ।
असृजं नेत्रजं वारि गिरिः प्रस्रवणादिव ॥ १ ॥
मां तु बाष्पमुखं दृष्ट्वा महर्षिः करुणान्वितः ।
अथ ध्यात्वा मुहूर्त्तं मां भगवानिदमब्रवीत् ॥ २ ॥
पक्षौ तु ते पक्षिपते पुनरन्यौ भविष्यतः ।
चक्षुषी प्राणबुद्धिश्च विक्रमश्च बलं च ते ॥ ३ ॥
पुराणे तु महत् कृत्यं त्वया कार्यं श्रुतं मया ।
दृष्टं मे तपसा चैव सत्यमेतन्निबोध मे ॥ ४ ॥
राजा दशरथो नाम कश्चिदिक्ष्वाकुनन्दनः ।
तस्य पुत्रो महातेजा रामो नाम भविष्यति ॥ ५ ॥
अरण्यं भार्यया सार्द्धं भ्रात्रा चैव गमिष्यति ।
कस्मिंश्चिदर्थे पित्रा स नियुक्तः सत्यविक्रमः ॥ ६ ॥
तस्य वै रावणो नाम भार्यामपहरिष्यति ।
राक्षसेन्द्रो जनस्थानादवध्यः सुरदानवैः ॥ ७ ॥
प्रलोभ्यमाना सा कामैर्वरैस्तैस्तैश्च मैथिली ।
याच्यमाना सती तत्र दुःखमग्ना न भोक्ष्यति ॥ ८ ॥
वरमन्नं च वैदेह्या ज्ञात्वा दास्यति वासवः ।
यदन्नममृतप्रख्यं सुराणामपि दुर्लभं ॥ ९ ॥

एवं कालात्ययस्तात इति कालविदां वर ।
एतमर्थं समग्रं मे सुपार्श्वः प्रत्यवेदयत् ॥५०॥
एतच्छ्रुत्वा न मे काचिद्बुद्धिरासीत् पराक्रमे ।
अपक्षो हि कथं पक्षी कर्म किञ्चित् समाचरेत् ॥५१॥
यत् तु शक्यं मया कर्तुमपि षड्गुणवर्तिना ।
वाङ्मात्रेण समर्थोऽहं साहाय्ये वानरर्षभाः ॥५२॥
श्रूयतां चाभिधास्यामि भवतां पौरुषाश्रयं ।
यच्च दाशरथेर्दुःखं मम तन्नास्ति संशयः ॥५३॥
भवन्तो हि मतिश्रेष्ठा मतिमन्तो यशस्विनः ।
सहिताः कपिराजेन देवैरपि दुरासदाः ॥५४॥
रामलक्ष्मणवाणाश्च निशिताः कङ्कपत्रिणः ।
त्रयाणामपि लोकानां समर्थास्त्राणनिग्रहे ॥५५॥
कामं खलु दशग्रीवस्तेजोबलसमन्वितः ।
भवतां तु समग्राणां न किञ्चित् कर्म दुष्करं ॥५६॥
तदलं कालहान्या तु क्रियतां बुद्धिनिश्चयः ।
न हि कर्मसु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥५७॥
न हीदमनुरूपं वो भूमौ प्रायोपवेशनं ।
सत्वविक्रमगाम्भीर्यबलयौवनशालिनां ॥५८॥
उत्तिष्ठध्वं न युक्तं हि त्यक्तुं कार्यमनुष्ठितं ।
कृते पुरुषकारे हि मरणं नाभिबाधते ॥५९॥

LXII.

एवं कथयतस्तस्य सम्पातेः सुमहात्मनः ।
उवाच जाम्बवान् वीरस्तत्कालसदृशं वचः ॥ १ ॥
सर्वं साधु सुयुक्तं च भवानर्थं प्रभाषते ।
वृद्धभावानुरूपं च हितं रघुकुलस्य च ॥ २ ॥
अस्माकं तु विचिन्त्येयं कथं सागरलङ्घनं ।
भवेदिति महाप्राज्ञ तेन स्मो व्याकुलीकृताः ॥ ३ ॥
तत्र नो गतिसाहाय्यं भवान् वै दातुमर्हति ।
परं पारं समुद्रस्य यथा नो गमनं भवेत् ॥ ४ ॥
तमेवं भाषमाणं तु युक्तमित्यङ्गदोऽब्रवीत् ।
अथाङ्गदमुवाचेदं सम्पाती मधुरं वचः ॥ ५ ॥
न मे दाशरथेः स्नेहादकार्यमिह विद्यते ।
किं करिष्याम्यशक्तस्तु प्लवने प्लवतां वर ॥ ६ ॥
तदैव हि दुरात्मासौ रावणः स्पर्धितो मया ।
यदि पक्षौ न दग्धौ मे भवेतां सूर्यतेजसा ॥ ७ ॥
मामासाद्य हि संक्रुद्धं समरे राक्षसाधमः ।
न जीवेदिति बुद्धिर्मे तथ्यमेतद्ब्रवीमि ते ॥ ८ ॥
सोऽहं वृद्धः कपिश्रेष्ठ न च शक्तः पराक्रमे ।
लङ्कां नेतुं न शक्नोमि स्वयं त्वां प्लवगेश्वर ॥ ९ ॥

असौ ममात्मजः श्रीमान् सुपार्श्वो नामधेयतः ।
एष नेतुं समर्थस्त्वां लङ्कां रावणपालितां ॥ १० ॥
इत्युक्त्वा पतगेन्द्रस्तु स्वं पुत्रं मनसास्मरत् ।
अथ प्रादुरभूत् तत्र मारुतः सुमहाद्भुतः ॥ ११ ॥
पत्तक्षेपपरिक्लिष्टाः सुपार्श्वेऽभ्युपयास्यति ।
सपुष्पाङ्कुरशाखाग्रा नृत्यन्तीव गिरेर्द्रुमाः ॥ १२ ॥
ततः प्रमाणाभ्यधिको गृध्रपुत्रो महाबलः ।
महापर्वतसंकाशो वानरानभ्यवर्तत ॥ १३ ॥
ततः सम्पातिपुत्रस्तु सुपार्श्वः सहसागतः ।
उवाच पितरं वाक्यमाहूतस्तात किं त्वहं ॥ १४ ॥
अथ पुत्रस्य सम्पातिः कथयामास विस्तरं ।
कथयित्वा च गमनं लङ्कां प्रत्यभ्यचोदयत् ॥ १५ ॥
एवमर्थं पितुः श्रुत्वा सुपार्श्वोऽङ्गदमब्रवीत् ।
त्यज्यतां मनसश्चिन्ता तारयिष्ये महार्णवं ॥ १६ ॥
बलं प्रमाणं शक्तिश्च परैरनुपमं मम ।
वेगस्तेजः प्रभावश्च मय्येव ध्रुवमक्षयं ॥ १७ ॥
शिखरात् तु महेन्द्रस्य पर्वतस्य प्लवङ्गमाः ।
सविंशे योजनशते सा लङ्का यत्र रावणः ॥ १८ ॥
क्षिप्रमारोह मे पृष्ठं शीघ्रगोऽहं महाबलः ।
अहं त्वां प्रापयिष्यामि परं पारं महोदधेः ॥ १९ ॥

अथोवाच महानेजा गृध्रराजमिदं वचः ।
अङ्गदो वदतां श्रेष्ठो मधुरं वाक्यमुत्तमं ॥ २० ॥
सदृशं चानुरूपं च वचनं भाषते भवान् ।
कृतमेतावदस्माकं यत् प्रवृत्तिर्निवेदिता ॥ २१ ॥
दिव्यविक्रमसंपन्ना बहवः सन्ति वानराः ।
उत्पाट्य तु महेन्द्रं ये गृध्र गच्छेयुरम्बरं ॥ २२ ॥
विश्रम त्वं महाबुद्धे सह पित्रा परंतप ।
कृता हि गमने बुद्धिर्मया रावणदर्शने ॥ २३ ॥
ते तु तद्वचनं श्रुत्वा प्रीतिसंहृष्टमानसाः ।
बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः ॥ २४ ॥

अथ पवनसमानविक्रमाः
प्लवगपुङ्गवाः परिपूर्णमानसाः ।
प्रियवचनशतानुवादिनो
हरितनयाः स च जाम्बवान् बभूवुः ॥ २५ ॥

इत्यार्षे रामायणे किष्किन्ध्याकाण्डे वानराश्वासनं नाम
एकषष्टितमः सर्गः — सुपार्श्वागमनं
नाम द्वाषष्टितमः सर्गः ॥

LXIII.

एवं कथयतस्तस्य पतगस्य महात्मनः ।
उत्पेततुस्तदा पक्षौ समक्षं वनचारिणां ॥ १ ॥
स दृष्ट्वा स्वां तनुं पक्षैरुद्गतैश्च तनुच्छदैः ।
प्रहर्षमतुलं लेभे सपुत्रः स महाबलः ॥ २ ॥
युवराजोऽङ्गदश्चैव जाम्बवांश्चर्क्षपार्थिवः ।
नलो नीलो गयो मैन्दो द्विविदो गवयस्तथा ॥ ३ ॥
तारो गवाक्षः कुमुदः शरभः पनसो हरिः ।
हनूमान् क्राथनश्चैव परं हर्षमुपागमन् ॥ ४ ॥
ऊचुश्च राममाहात्म्यं महावीर्यं च लक्ष्मणं ।
ययोः प्रभावात् सम्पातिरपक्षः पक्षवानभूत् ॥ ५ ॥
अशरीरा ततो वाणी दिव्या प्रादुरभूत् तदा ।
एवमेतद्धरिश्रेष्ठाः प्रभाषध्वं यथावचः ॥ ६ ॥
ततः प्रहृष्टः सम्पाती वानरानिदमब्रवीत् ।
हर्षविस्तीर्णया वाचा स्वरसंपत्प्रसक्तया ॥ ७ ॥
निशाकरस्य विप्रर्षेः प्रभावात् सुमहात्मनः ।
समुत्थिताविमौ पक्षौ सर्वे पश्यन्तु वानराः ॥ ८ ॥
इत्युक्त्वा वानरान् सर्वान् सम्पाती खचरेश्वरः ।
उत्पपात गिरेः शृङ्गाज्जिज्ञासन्नात्मनो गतिं ॥ ९ ॥

ततस्तु वानराः सर्वे विस्मयोत्फुल्ललोचनाः ।
पर्वताग्रमवैक्षन्त सम्पातिगमनं महत् ॥ १० ॥
शिखरस्थस्तु सम्पाती पुनस्तानिदमब्रवीत् ।
हर्षविस्तीर्णया वाचा स्वरसंपत्प्रयुक्तया ॥ ११ ॥
निशाकरस्य तस्यर्षेः सर्वे पश्यत वानराः ।
सम्यक् ततस्य तपसः प्रभावमिममीदृशं ॥ १२ ॥
आदित्यरश्मिनिर्दग्धौ पक्षावगमनक्षमौ ।
संवृत्तौ तत्प्रभावेन क्षणेन गमनक्षमौ ॥ १३ ॥
यौवने वर्तमानस्य ममासीद्यः पराक्रमः ।
तमेवाद्याधिगच्छामि बलं पौराणमात्मनः ॥ १४ ॥
सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ ।
पक्षलम्भो ममायं वः प्रत्यक्षं संनिदर्शितः ॥ १५ ॥
क्रोशमात्रमितो गत्वा दक्षिणस्योत्तरं गिरिं ।
शतयोजनविस्तीर्णं लङ्घयित्वा महोदधिं ॥ १६ ॥
तत्र त्रिकूटशिखरे रक्षितां रावणेन यां ।
लङ्कां द्रक्ष्यथ दुर्धर्षां निहिता यत्र मैथिली ॥ १७ ॥
रक्ष्यमाणा सुघोराभी राक्षसीभिः समन्ततः ।
निर्भर्त्स्यमाना बहुशस्तस्य रौद्रस्य शासनात् ॥ १८ ॥
कृतार्थाश्च प्रतीताश्च दृष्ट्वा सीतां तपस्विनीं ।
धर्षयित्वा पुरीं लङ्कां पुनरेष्यथ वानराः ॥ १९ ॥

न खल्वस्ति बलं किञ्चिन्मम ज्ञातुमनागतं ।
अनुभावात् तु जानामि महर्षेर्भावितात्मनः ॥ २० ॥
हिमवन्तं गमिष्यामि शङ्करश्वशुरं गिरिं ।
यत्र मे दयिता भार्या तनयाश्च कृतालयाः ॥ २१ ॥
विशालशिखरः प्रांशुर्मलयस्याविदूरतः ।
वानरा गम्यतामेष दक्षिणस्योत्तरो गिरिः ॥ २२ ॥
यः शक्तो योजनशतं निरालम्बमपर्वतं ।
क्रमितुं वानरः शूरः सर्वैः स विनियुज्यतां ॥ २३ ॥
एवमुक्त्वा तु सम्पाती तानामन्त्र्य प्लवङ्गमान् ।
जगामाकाशमाविश्य सुपर्ण इव वेगितः ॥ २४ ॥
प्रोड्डीनं तु खगं दृष्ट्वा प्रहृष्टान् वानरर्षभान् ।
इदं हृष्टतमो भूत्वा बालिपुत्रोऽङ्गदोऽब्रवीत् ॥ २५ ॥
दत्वा प्रवृत्तिं वैदेह्या जीवयित्वा च वानरान् ।
गतः स्वं निलयं पक्षी सम्पाती हृष्टमानसः ॥ २६ ॥
तदागच्छत गच्छाम दक्षिणस्योत्तरं गिरिं ।
तत्रस्थाश्चिन्तयिष्यामो लङ्घनं वै महोदधेः ॥ २७ ॥
ततस्तथेति प्रवदन्तमङ्गदं
प्रहर्षयुक्ता अवदन् महाबलाः ।
स चान्वितो ज्ञातिबलेन सत्वरो
जगाम तं गृध्रनिवेदितं गिरिं ॥ २८ ॥

अथ पवनसमानविक्रमाः
प्लवङ्गमाः परिपूर्णमानसाः ।
त्वरितमभिमतां दिशं ययुस्ते
कृतमतयः पितृराजरक्षितां ॥ २१ ॥

इत्यार्षे रामायणे महर्षिवाल्मीकीये आदिकाव्ये
चतुर्विंशतिसाहस्र्यां संहितायाम्
किष्किन्धाकाण्डे सम्पातिपक्षोद्गमनं नाम
त्रिषष्टितमः सर्गः ॥

किष्किन्धाकाण्डं समाप्तं ॥

सुन्दरकाण्डं

अथ

श्रीरामायणे वाल्मीकीये सुन्दरकाण्डं

I.

आख्याते गृध्रराजेन समुत्पत्य प्लवङ्गमाः ।
सहिताः प्रीतिसंहृष्टाः सिंहनादं विनेदिरे ॥ १ ॥
ते तु गत्वा समुद्रस्य दक्षिणस्योत्तरं गिरिं ।
समुद्रं ददृशुर्भीमं तिमिनक्रसमाकुलं ॥ २ ॥
तं समुद्रं समालोक्य वानरा भीमविक्रमाः ।
सर्वलोकस्य महतः प्रतिविम्बमिवार्णवं ॥ ३ ॥
सत्त्वैर्महद्भिर्विकृतैः क्रीडद्भिर्बहुभिर्जले ।
व्यादितास्यैर्महाकायैरूर्मिभिश्च समावृतं ॥ ४ ॥
प्रसुप्तमिव चान्यत्र क्रीडन्तमिव कुत्रचित् ।
क्वचित् पर्वतमात्रैश्च जलराशिभिरुच्छ्रितैः ॥ ५ ॥
संकुलं दानवेन्द्रैश्च पातालतलवासिभिः ।
लोमहर्षणमक्षोभ्यं दृष्ट्वा ते सागरं तदा ॥ ६ ॥

दक्षिणस्य समुद्रस्य तीरमुत्तरमागताः ।
संनिवेशं ततश्चक्रुः सर्वे ते हरियूथपाः ॥ ७॥
आकाशमिव निष्पारं दृष्ट्वा ते सागरं ततः ।
निषेदुः कपयः केचित् केचिज्जह्रषिरे मुदा ॥ ८॥
विषण्णवदनान् दृष्ट्वा तत्र कांश्चित् प्लवङ्गमान् ।
आश्वासनार्थं तेजस्वी तारेयो वाक्यमब्रवीत् ॥ ९॥
अनुमान्य हरीन् वृद्धानितराननुशास्य च ।
उवाच मा पुनर्भैष्ट कृतकृत्या दृढं वयं ॥ १०॥
निशां तावदिमां सर्वे वसन्तु विगतज्वराः ।
श्वः प्रभाते करिष्यामो यन्नः श्रेयो भविष्यति ॥ ११॥
अथ रात्र्यां व्यतीतायामङ्गदो हरियूथपः ।
सह तैर्वानरैः सर्वैर्निषसाद गिरेस्तटे ॥ १२॥
सा वानराणां ध्वजिनी परिवार्याङ्गदं बभौ ।
वासवं परिवार्येव वाहिनी मरुतां यथा ॥ १३॥
कोऽन्यस्तां वानरीं सेनां शक्तः स्तम्भयितुं भवेत् ।
अङ्गदाद्वि विदान्मैन्दादन्यतो वा हनूमतः ॥ १४॥
तान् विषादेन महता सहसाभिपरिप्लुतान् ।
बालिपुत्रोऽङ्गदो धीमानिदं वचनमब्रवीत् ॥ १५॥
न विषादं महावीर्याः कर्तुमर्हथ वानराः ।
विषण्णो हि जनः शक्तो न भवत्यर्थसाधकः ॥ १६॥

यो विषादं प्रसहते विषमे समुपस्थिते ।
तेजसा तस्य युक्तस्य पुरुषार्थो न सिध्यते ॥ १७॥
न विषादे मनः कार्यं विषादो विषमुत्तमं ।
मारयत्यकृतप्रज्ञं बालं क्रुद्ध इवोरगः ॥ १८॥
को योजनशतं साग्रं लङ्घयेत प्लवङ्गमाः ।
क इमान् वानरान् सर्वान् मोक्षयेद्बधबन्धनात् ॥ १९॥
वासवस्य सवज्रस्य ब्रह्मणो वा स्वयम्भुवः ।
विक्रम्य सहसा हस्तादमृतं स इहानयेत् ॥ २०॥
चन्द्रादपि हरेल्लक्ष्मीं तेजो वा रविमण्डलात् ।
लङ्कामितो विक्रमेण गच्छेच्च इति मे मतिः ॥ २१॥
विक्रम्य य इतो लङ्कां गत्वा तु पुनराव्रजेत् ।
बुद्ध्वा बुद्ध्वा समाख्यातु यस्य या परमा गतिः ॥ २२॥
यस्य प्रसादात् पुत्रांश्च दारांश्चैव धनानि च ।
इतो निवृत्ताः पश्येम सिद्धार्थाः सुखिनो वयं ॥ २३॥
कस्य प्रसादाद्रामं च लक्ष्मणं च महाबलं ।
अभिगच्छेम संहृष्टाः सुग्रीवं च कपीश्वरं ॥ २४॥
यदि कश्चित् समर्थो वः सागरप्लवने हरिः ।
स ददातु जनस्यास्य पुण्यामभयदक्षिणां ॥ २५॥
अङ्गदस्य वचः श्रुत्वा न किञ्चित् कश्चिदब्रवीत् ।
तिमिताश्चाभवन् सर्वे तत्र ते हरियूथपाः ॥ २६॥

अथ तांस्तिमितान् दृष्ट्वा स्विन्नगात्रान् व्यवस्थितान् ।
अङ्गदो हरिशार्दूलः पुनर्वचनमब्रवीत् ॥ २७ ॥
वानराः क इदानीं वो लङ्घयिष्यति सागरं ।
कः करिष्यति रामस्य नृपस्य प्रियमुत्तमं ॥ २८ ॥
क इमान् वानरान् सर्वान् प्राणसंशयमागतान् ।
मोक्षयिष्यति सुग्रीवात् क्रुद्धान्मृत्युमुखादिव ॥ २९ ॥
कः करिष्यति सुग्रीवं सत्यसन्धमसंशयं ।
कः करिष्यति रामस्य प्रियमात्यन्तिकं हरिः ॥ ३० ॥
सर्वे हि प्लवतां श्रेष्ठाः सर्वे विश्रुतपौरुषाः ।
उपदेशे च विख्याताः पूजिताश्चाप्यभीक्ष्णशः ॥ ३१ ॥
न हि नो गमने भङ्गः कदाचित् कस्यचित् क्वचित् ।
सर्वे भवन्तो विख्याता गरुडानिलरंहसः ॥ ३२ ॥
यदि कश्चित् समर्थो वः सागरप्लवने हरिः ।
स ब्रवीतु हरिश्रेष्ठो वीर्यमूर्जितमात्मनः ॥ ३३ ॥
दृष्टपूर्वोऽपि वा लोके श्रुतपूर्वोऽपि वा क्वचित् ।
को वः किम्वा प्रक्रमते हरिश्रेष्ठो महाबलः ॥ ३४ ॥
दृष्ट्वा वीर्यमहं तस्य भवद्भिः सहितस्त्वरन् ।
कृतकृत्यो भविष्यामि ध्रुवं प्लवगसत्तमाः ॥ ३५ ॥
तद्ब्रूत त्वरिताः सर्वे यस्य या परमा गतिः ।
अथाङ्गदवचः श्रुत्वा हृष्टाः शाखामृगर्षभाः ॥ ३६ ॥

कृताञ्जलिपुटास्तत्र वाक्यमङ्गदमब्रुवन् ।
सेनामध्यात् समुत्पत्य हर्षयन्तः प्लवङ्गमान् ॥ ३७ ॥
गयो गवाक्षो गवयः शरभो गन्धमादनः ।
मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवान् नलः ॥ ३८ ॥
नीलस्तारश्च रम्भश्च ऋषभः क्रथनस्तथा ।
सानुप्रस्थोऽथ पनसस्तथा दधिमुखो हरिः ॥ ३९ ॥
एतच्छ्रुत्वा महद्वाक्यमङ्गदेन समीरितं ।
वक्तुकामा महात्मानस्तस्थुः प्राञ्जलयस्तदा ॥ ४० ॥
गयः पूर्वमुवाचेदं गमिष्ये दशयोजनं ।
गवाक्षो योजनान्याह गमिष्ये विंशतिं परं ॥ ४१ ॥
अब्रवीद्गवयः श्रीमांस्तस्यां वानरसंसदि ।
यामि त्रिंशतमेकाह्ना योजनानीति वीर्यवान् ॥ ४२ ॥
अथाद्रिशिखराकारो विक्रमेऽप्रतिमो हरिः ।
शरभः सुमहातेजाः प्रत्युवाचेदमङ्गदं ॥ ४३ ॥
चत्वारिंशतमेकाह्ना योजनानि व्रजाम्यहं ।
ततो हेमोपमः श्रीमानब्रवीद्गन्धमादनः ॥ ४४ ॥
सुखं योजनपञ्चाशत् क्रमेयं वानरर्षभाः ।
ततस्तु हिमवत्प्रायो मैन्दो वाक्यमथाब्रवीत् ॥ ४५ ॥
योजनानामहं षष्टिमुपक्रमितुमुत्सहे ।
द्विविदस्तु महातेजाः प्रत्युवाचेदमङ्गदं ॥ ४६ ॥

गमिष्यामि न संदेहः सप्ततिं योजनान्यहं ।
अग्निपुत्रस्ततो धीमान् नीलो वचनमब्रवीत् ॥४७॥
अशीतिं वै गमिष्यामि योजनानां प्लवङ्गमाः ।
त्वष्टुः पुत्रो नलः श्रीमानब्रवीद्धरिपुङ्गवः ॥४८॥
गच्छेयं नवतिं पूर्णां योजनानीति हृष्टवत् ।
तारोऽब्रवीत् ततस्तत्र महाबलपराक्रमः ॥४९॥
नवतिं योजने द्वे च गमिष्यामीति वीर्यवान् ।
ततः सागरगम्भीरो वानरः पवनो जवे ॥५०॥
मन्दरस्य प्रमाणेन भास्कराग्निसमप्रभः ।
तत्र सर्वान् हरिवरान् जाम्बवाननुमान्य ह ॥५१॥
उवाच हरिमुख्यानां संनिधौ प्रहसन्निव ।
तारुण्ये मे बलं वीर्यं यश्चासीद्विक्रमो मम ॥५२॥
नैतावानेव खल्वस्ति गमने वा पराक्रमे ।
यत् कृतं यौवनस्थेन मया तच्छ्रोतुमर्हथ ॥५३॥
मया जटायुषा चैव बलियज्ञे सनातनः ।
विक्रमांस्त्रीन् क्रमन् विष्णुस्त्रिस्त्रिः प्रदक्षिणीकृतः ॥५४॥
बालभावे तदासीन्मे बलमप्रतिमं परं ।
स इदानीमहं वृद्धो न तथा विक्रमान्वितः ॥५५॥
संप्रत्येतावतीं शक्तिं गमने तर्कयाम्यहं ।
दशोनं योजनशतं नवोनं वा न संशयः ॥५६॥

एतावता समाप्तिश्च न कार्यस्यास्य दृश्यते ।
हेतुमद्धाहकं वाक्यं तथोक्तवति जाम्बवे ॥ ५७ ॥
ततः पर्वतसंकाशो हनूमानञ्जनासुतः ।
न किञ्चिदब्रवीत् तत्र बलं पौरुषमात्मनः ॥ ५८ ॥
अथोत्तरमुदारार्थमङ्गदो वाक्यमब्रवीत् ।
अनुमान्य महात्मानं जाम्बवन्तं महाकपिं ॥ ५९ ॥
क्रमेयं योजनशतं संदेहो नास्ति वानराः ।
पुनस्त्वागमने शक्तिं शीघ्रं नामर्षयाम्यहं ॥ ६० ॥
बाल्यादक्लिष्टभावाच्च गुणदोषाविचारणात् ।
पित्राहं लालितः स्नेहान्न श्रमं ग्राहितः पुरा ॥ ६१ ॥
तमुवाच महाप्राज्ञो जाम्बवान् प्रहसन्निव ।
नैवं युक्तं त्वया वीर वक्तुं वानरसंसदि ॥ ६२ ॥
वयं सर्वे विजानीमो युवराज बलं तव ।
गत्वा गत्वा निवर्तेथाः शतकृत्वा महार्णवं ॥ ६३ ॥
त्वं हि बालिबलाद्धीनः किञ्चिद्वानरपुङ्गव ।
योजनानां सहस्रस्य भवान् शक्तो हि लङ्घने ॥ ६४ ॥
यादृशो हरिशार्दूलो बालिः प्रथितविक्रमः ।
सुग्रीवश्च महाबाहुस्तादृशस्त्वं हरीश्वर ॥ ६५ ॥
त्वं हि प्रेषयितास्माकं निग्रहानुग्रहे प्रभुः ।
तवाज्ञानिरताः सर्वे वयं मार्गाम मैथिलीं ॥ ६६ ॥

अस्माकं यदि न स्यास्त्वमग्रणीर्वानरेश्वर ।
न कस्यचिद्वयं किञ्चिच्छृणुयाम परस्परं ॥ ६७ ॥
न च प्रेषयिता कश्चित् प्रेष्यैः समनुयुज्यते ।
भवतश्च वयं सर्वे प्रेष्या वानरसत्तम ॥ ६८ ॥
भवान् सर्वत्र चास्माकं स्वामिभावे व्यवस्थितः ।
स्वामी किल त्वं सैन्यस्य मतिरेषा परा सतां ॥ ६९ ॥
अस्माकं च महाबाहो भवान् मूलमरिन्दम ।
तस्मात् कलत्रवत् तात परिपाल्यः सदा भवान् ॥ ७० ॥
मूलं हि सर्वदा रक्ष्यं वृक्षस्य हरिपुङ्गव ।
मूले हि रक्षिते तात गुणाः पुष्पफलोदयाः ॥ ७१ ॥
तद्भवानस्य सैन्यस्य मूलं सत्यपराक्रम ।
वयं तव महाबाहो शाखापत्रफलोपमाः ॥ ७२ ॥
गुरुश्च गुरुपुत्रश्च त्वं हि नः कपिसत्तम ।
भवन्तमाश्रित्य वयं समर्था ह्यर्थनिश्चये ॥ ७३ ॥
तन्न शक्यं त्वया गन्तुमस्मानुत्सृज्य वै क्वचित् ।
न चास्माकं क्षमं वीर मोक्तुं त्वां हरिपुङ्गव ॥ ७४ ॥
उक्तवन्तं महाप्राज्ञं जाम्बवं हरियूथपं ।
प्रत्युवाचोत्तरं वाक्यं हृष्टदीनमुखोऽङ्गदः ॥ ७५ ॥
यदि नाहं गमिष्यामि न चान्यो वानरर्षभः ।
गमिष्यति द्रुतं लङ्कां ते वयं संशयं गताः ॥ ७६ ॥

पुनः खल्विदमस्माकं प्राप्तं प्रायोपवेशनं ।
न ह्यकृत्वा हरिपतेः संदेशं तस्य धीमतः ॥ ७७ ॥
तत्रापि गत्वा प्राणानां पश्यामि परिरक्षणं ।
अतीतसमयानस्मान् दृष्ट्वा स हरिसत्तमः ॥ ७८ ॥
शङ्कमानश्च मां दृष्ट्वा बधायाज्ञापयिष्यति ।
विशेषेण च सुग्रीवो मय्येव हरिपुङ्गवः ॥ ७९ ॥
निपातयिष्यति क्रूरं दण्डं प्राणापहारिणं ।
निः संशयोऽपि हि बधः सुग्रीवान्मम दृश्यते ॥ ८० ॥
ससंशयं च गत्वा मे पुनः प्रतिनिवर्तनं ।
निःसंशयादभावाच्च श्रेयान् संशयितो बधः ॥ ८१ ॥
इत्येवमर्थशास्त्रेषु प्रवृत्तिरुपलभ्यते ।
स हि क्रोधे प्रसादे च प्रभुरस्माकमीश्वरः ॥ ८२ ॥
अकृत्वा तस्य संदेशं विनाशो नियतं भवेत् ।
सोऽहं निःसंशयं यास्ये परं पारं महोदधेः ॥ ८३ ॥
आगमिष्यामि च पुनर्दृष्ट्वैव जनकात्मजां ।
तदेतत् सुविनिश्चित्य बुद्ध्या सर्वे वनौकसः ॥ ८४ ॥
यन्नः क्षेमं कृत्यतमं द्रुतं तद्वक्तुमर्हथ ।
तद्यथा ह्यस्य कार्यस्य न भवेदन्यथा गतिः ॥ ८५ ॥
यूयं हि बुद्धिशास्त्रज्ञाः संचिन्तयितुमर्हथ ।
तथोक्तवति तद्वाक्यं युवराजेऽङ्गदे तदा ॥ ८६ ॥

कृताञ्जलिपुटाः सर्वे वानराः संप्रणेदिरे ।
न शक्यं भवता गन्तुमितः पदमपि क्वचित् ॥ ८७ ॥
दृष्ट्वा मन्यामहे सर्वे त्वां वयं बालिदर्शनं ।
शुभं वा यदिवा पापं प्रियं वा यदिवाप्रियं ॥ ८८ ॥
सहितास्तत् सहिष्यामः सुग्रीवाद्यद्भविष्यति ।
अङ्गदे तु शुभं वाक्यं प्रत्युक्ते प्लवगर्षभैः ॥ ८९ ॥
अथ तत्र महाबुद्धिर्बुद्ध्या संचिन्त्य वानरान् ।
वानरप्रीतिजननमुदारं वाक्यकोविदः ॥ ९० ॥
जाम्बवानुत्तरं वाक्यमब्रवीद्बालिनः सुतं ।
सेत्स्यते वीर कार्यार्थो न किञ्चित् परिहास्यते ॥ ९१ ॥
अहं संनोदयाम्येनं यः कार्यं साधयिष्यति ।
मुहूर्त्तमात्रं निःशब्दा भवत प्लवगर्षभाः ॥ ९२ ॥
यावन्निः श्रेयसं वाक्यं किञ्चित् प्रकथयाम्यहं ।
जाम्बवेन तथोक्ते तु वाक्ये वानरसंसदि ॥ ९३ ॥
सर्वा सा वानरचमूस्तूष्णीं तमभितः स्थिता ।
सोऽब्रवीत् तु महाबाहुर्जाम्बवो हरियूथपः ॥ ९४ ॥
अङ्गदाभिमुखः स्थित्वा संप्रहृष्टतनूरुहः ।
अहं जानामि तं वीरं वानरं वानरर्षभाः ॥ ९५ ॥
यो गत्वा योजनशतं कृतार्थः पुनरेष्यति ।
शलाकाग्निप्रविष्टा तु संनिकर्षान्न दृश्यते ।

सेव दूरस्थिता दृश्या भवत्यनभिसंवृता ॥ १६ ॥

ततः कपिर्वृद्धतमस्तु जाम्बवान्

तूष्णीकमासाद्य सुखोपविष्टं ।

आमन्त्रयामास कपिप्रवीरम्

एकान्तशान्तं हनुमन्तमेकं ॥ १७ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे समुद्रक्रमणचिन्ता

नाम प्रथमः सर्गः ॥

II.

अनेकशतसाहस्रीं विषण्णां हरिवाहिनीं ।
जाम्बवान् समुदीक्ष्याथ हनूमन्तमुवाच ह ॥ १ ॥
मुख्यं वानरसैन्यस्य सर्वशास्त्रार्थकोविदं ।
तूष्णीमेकान्तमासाद्य हनुमन् किं न भाषसे ॥ २ ॥
यो युक्तो बुद्धिशास्त्राभ्यां यशसा विक्रमेण च ।
कर्मणां चाप्युपायज्ञः सोऽस्यां धुरि नियुज्यते ॥ ३ ॥
अथाब्रवीन्महातेजास्तारेयो वानरोऽङ्गदः ।
अहमेतान् गुणान् मन्ये भूयिष्ठांश्च गुणोत्तरान् ॥ ४ ॥
वानरा वानरश्रेष्ठे वपुष्मति हनूमति ।
एष वायोर्बले तुल्यस्तद्वेग इव शीघ्रगः ॥ ५ ॥
हनूमान् वायुपुत्रस्तु कार्येऽत्र विनियुज्यतां ।
यशस्वी द्युतिमांश्चैव रामसुग्रीवयोर्हितः ॥ ६ ॥
अनेन सह सख्यं च विहितं लोकवीरयोः ।
धर्मजुष्टमिदं कार्यं लोकजुष्टं यशस्करं ॥ ७ ॥
प्रियं वानरराजस्य करिष्यति न संशयः ।
इति वानरमुख्यस्य समनुज्ञाय शासनं ॥ ८ ॥
अथोचुर्हनुमन्तं ते वानरा वानरर्षभं ।
हनुमन् हरिराजस्य सुग्रीवस्य समो ह्यसि ॥ ९ ॥

रामलक्ष्मणयोश्चापि तेजसा च बलेन च ।
अरिष्टनेमिनो भ्राता वैनतेयो महाबलः ॥ १० ॥
विक्रमश्चैव वेगश्च ते न तेनावहीयते ।
बलं बुद्धिश्च तेजश्च सत्त्वं च हरिपुङ्गव ॥ ११ ॥
विशिष्टं सर्वभूतानामात्मानं किं न बुध्यसे ।
अप्सराप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला ॥ १२ ॥
अभिशापादभूत् तात वानरी कामरूपिणी ।
दुहिता हरिमुख्यस्य कुञ्जरस्य महात्मनः ॥ १३ ॥
अञ्जनेति परिख्याता पत्नी केशरिणः कपेः ।
अभिशापक्षयाज्जाता पुनश्च दिवि चारिणी ॥ १४ ॥
कपित्वे चारुसर्वाङ्गी कदाचित् कामरूपिणी ।
मानुषं विग्रहं कृत्वा साक्षादमरवर्णिनी ॥ १५ ॥
व्यचरत् पर्वतस्याग्रे प्रावृष्यम्बुदसंनिभे ।
विचित्रमाल्याभरणा महार्हक्षौमवासिनी ॥ १६ ॥
वस्त्रं तस्या विशालाक्ष्याः पीतरक्तं सुशोभनं ।
स्थितायाः पर्वतस्याग्रे मारुतोऽपाहरच्छनैः ॥ १७ ॥
स ददर्श ततस्तस्या वृत्तावूरू सुसंहतौ ।
स्तनौ पीनौ च रुचिरौ सुरूपौ प्रियदर्शनौ ॥ १८ ॥
तां विशालायतश्रोणीं तनुमध्यामनिन्दितां ।
दृष्ट्वैव चारुसर्वाङ्गीं मारुतः काममोहितः ॥ १९ ॥

स तां भुजाभ्यां दीर्घाभ्यां पर्यष्वजत भाविनीं ।
मन्मथाविष्टसर्वात्मा ते मातरमनिन्दितां ॥ २० ॥
तत्र सा कोपसंरक्ता सुनेत्रा वाक्यमब्रवीत् ।
एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ २१ ॥
अञ्जनाया वचः श्रुत्वा प्रत्यभाषत मारुतः ।
न त्वां हिंसामि कल्याणि मारुतोऽस्मि शुभानने ॥ २२ ॥
मनसास्मि गतो यस्त्वां परिष्वज्य यशस्विनीं ।
वीर्यवान् बुद्धिसंपन्नस्तव पुत्रो भविष्यति ॥ २३ ॥
स त्वं केशरिणः क्षेत्रे संभूतोऽमितविक्रमः ।
मारुतस्यौरसः पुत्रस्तेजसा चासि तत्समः ॥ २४ ॥
उद्यन्तं हि त्वमादित्यं बालो दृष्ट्वा महाचले ।
गृहीतुकामः क्रीडार्थं गिरेरुत्पतितो दिवं ॥ २५ ॥
शतानि त्रीणि तत्रोर्द्ध्वं योजनानां महाकपे ।
तेजसार्कस्य निर्धूतो न विषादं गतस्तदा ॥ २६ ॥
भवत्युत्पतिते शीघ्रमन्तरीक्षं महाकपे ।
क्षिप्तमिन्द्रेण वज्रं ते क्रोधाविष्टेन धीमता ॥ २७ ॥
तत्राधःपतितो दिव्यादन्तरीक्षात् कपे तव ।
हनुः शैलेन्द्रशिखरे वाम एष त्वभज्यत ॥ २८ ॥
ततस्तु नामधेयं ते हनूमानिति विश्रुतं ।
त्वं हि वायुसुतस्तात बलवान् कपिकुञ्जरः ॥ २९ ॥

वयमद्य गतप्राणा न तथा विक्रमोऽस्ति नः ।
तेजोबलसमायुक्तः पक्षिराजसमक्रमः ॥ ३० ॥
त्रिविक्रमः पुरास्माभिः कृतो विष्णुः प्रदक्षिणः ।
त्रिःसप्तकृत्वः पृथिवी कृतास्माभिः प्रदक्षिणा ॥ ३१ ॥
तथा चौषधयोऽस्माभिः संचिता देवशासनात् ।
निष्पन्नममृतं याभिस्तदासीन्नो महद्बलं ॥ ३२ ॥
स इदानीमहं वृद्धो व्यतिक्रान्तपराक्रमः ।
साम्प्रतं मृत्युकालोऽयं भवान् सर्वगुणान्वितः ॥ ३३ ॥
तद्विजृम्भस्व विक्रान्त प्लवतां प्रवरो ह्यसि ।
यो हि विक्रमते धृष्टं विषमे पर्युपस्थिते ॥ ३४ ॥
पर्जन्यमिव भूतानि लोकस्तमनुजीवति ।
एतावान् पुरुषार्थो हि विक्रमस्य प्रयोजनं ॥ ३५ ॥
यस्य पौरुषमश्नन्ति मित्रस्वजनबान्धवाः ।
अमरा इव शक्रस्य सफलं तस्य जीवितं ॥ ३६ ॥
युक्तो यो बुद्धिशास्त्राभ्यां प्रशस्तः पौरुषेण च ।
कर्मणां चाप्युपायज्ञः सोऽस्यां धुरि नियुज्यते ॥ ३७ ॥
तदप्रमेयं वचनं सम्यग्विज्ञाय तत्त्वतः ।
हनूमन्तमथोचुस्ते लङ्कां गच्छेति वानराः ॥ ३८ ॥
दर्शयस्व महातेजो लोके लोकाधिको ह्यसि ।
अप्रमेयाप्रमेयस्य पारं गच्छ महोदधेः ॥ ३९ ॥

विस्मापय जगत् सर्वं विक्रमस्व दिवं कपे ।
सीतायाश्चिरनष्टायास्त्वमद्य पदवीं चर ॥४०॥
कथ्यतां त्रिषु लोकेषु कर्म ते पुण्यकर्मणः ।
अमानुषमिदं कर्म लङ्घनं लवणाम्भसः ॥४१॥
यशसा योजयात्मानमायुषा चापि बान्धवान् ।
निर्देशसिद्ध्या भर्तारं परिज्ञानेन राघवं ॥४२॥
त्वद्वीर्यं द्रष्टुकामेयं सर्वा वानरवाहिनी ।
उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवं ॥४३॥
वायोरपि गतिर्नैषा हनूमन् या गतिस्तव ।
विषण्णान् प्लवगान् सर्वान् हनूमन् किमुपेक्षसे ॥४४॥
विक्रमस्व महाबाहो विष्णुस्त्रीन् विक्रमानिव ।
समर्थो ह्यनिलस्यापि गतिं गन्तुं सुदुर्गमां ॥४५॥

ततः कपीनां प्रवरेण चोदितः
प्रतीतवेगः पवनात्मजः कपिः ।
प्रहर्षयंस्तां हरिवाहिनीं तदा
चकार रूपं प्लवनाय विस्तृतं ॥४६॥

इत्यार्षे रामायणे सुन्दरकाण्डे हनूमदुत्तेजनं
नाम द्वितीयः सर्गः ॥

III.

संस्तूयमानो हनुमान् व्यवर्धत महाकपिः ।
समाविध्यत लाङ्गूलं चरणौ चान्तकोपमः ॥ १ ॥
तस्य संस्तूयमानस्य वृद्धैर्वानरपुङ्गवैः ।
तेजसा पूर्यमाणस्य रूपमासीत् तदद्भुतं ॥ २ ॥
यथा चन्द्रमसो वृद्ध्या पूर्यते सागरोऽम्भसा ।
ववृधे स्तूयमानस्य तथा वीर्यं हनूमतः ॥ ३ ॥
यथा विजृम्भते सिंहः प्रवृद्धः काननान्तरे ।
मारुतस्यौरसः पुत्रस्तथा संप्रत्यजृम्भत ॥ ४ ॥
अशोभत मुखं तस्य जृम्भमाणस्य धीमतः ।
अम्बरीषोपमं दीप्तं विधूम इव पावकः ॥ ५ ॥
हरीणामुत्थितो मध्यात् संप्रहृष्टतनूरुहः ।
अभिवाद्य कपीन् वृद्धानिदं वचनमब्रवीत् ॥ ६ ॥
एवं भवतु विक्रम्य लङ्घयिष्यामि सागरं ।
कृतार्थश्च निवर्तिष्ये अद्रष्टुं मे प्लवङ्गमाः ॥ ७ ॥
यद्येतच्छतकृत्वोऽपि गन्तव्यं शतयोजनं ।
अहमेतद्गमिष्यामि प्रीताः सन्तु वनौकसः ॥ ८ ॥
बलं च मम वीर्यं च पिता यश्च मम प्रभुः ।
मातुश्च मम यद्वृत्तं सर्वं तच्छ्रोतुमर्हथ ॥ ९ ॥

प्रत्ययार्थं स्ववीर्यस्य कुलं वक्ष्यामि यादृशं ।
न विस्मयकृताद्भावान्नोत्सेकात् प्रवदाम्यहं ॥१०॥
इदं केशरिणस्तस्य पितुरासीन्मया श्रुतं ।
मम जन्म यथासत्यमद्भुतं मातरिश्वनः ॥११॥
पश्चिमस्य समुद्रस्य तीर्थं पुण्यमभिष्टुतं ।
प्रभासमृषयो यत्र निमज्जन्ति समाहिताः ॥१२॥
तत्राथ धवलो नाम दुष्टः कश्चन दिग्गजः ।
स तानृषीन् भीमबलो जघान किल वीर्यवान् ॥१३॥
तदुपस्पर्शनं पुण्यं गच्छन्तमृषिपूजितं ।
भरद्वाजमृषिं तत्र सोऽभ्यद्रवद्गजस्तदा ॥१४॥
ततः पर्वतकूटाभः पिता मम महाबलः ।
तं ददर्श महात्मानं हस्तिना समभिद्रुतं ॥१५॥
स तु तूर्णं महाभीमं रूपं कृत्वा पिता मम ।
तस्योपरिष्टान्न्यपतत् कुञ्जरस्य तरस्विनः ॥१६॥
स नखैश्च सुतीक्ष्णाग्रैर्दशनैश्च महाबलः ।
संप्रमथ्याक्षिणी तस्य बिभेद कपिकुञ्जरः ॥१७॥
अवप्लुत्य च वेगेन पिता मम कपीश्वरः ।
तस्य वक्त्रादुभौ दन्तावुज्जहार बलाद्बली ॥१८॥
ताभ्यामेव जघानैनं दन्ताभ्यामेव वेगितः ।
स पपात हतो भूमौ नागो नग इवापरः ॥१९॥

तस्मिन् हते गजे रौद्रे गृहीत्वा पितरं मुनिः ।
आजगाम मुनिभ्यश्च न्यवेदयत तं हतं ॥ २० ॥
योऽसौ रौद्रो गजः पुण्यं तीर्थमुत्सादयत्यलं ।
सोऽनेन कपिराजेन निहतोऽक्लिष्टकर्मणा ॥ २१ ॥
परस्परेण संगम्य प्रीतो मुनिगणोऽब्रवीत् ।
यदिच्छति कपिस्तद्धि वरमस्मै प्रदीयतां ॥ २२ ॥
ततस्ते मुनयः सर्वे वरमस्मै ददुस्तदा ।
पित्रे मम महात्मानो वरं वेदविदां वराः ॥ २३ ॥
ततो मम पिता वव्रे पुत्रं मारुतविक्रमं ।
द्विजप्रसादादिच्छेयं कामरूपिणमव्ययं ॥ २४ ॥
ततस्ते मुनयः प्रीता अब्रुवन् पितरं मम ।
भविष्यति सुतस्ते हि यथोद्दिष्टो महाकपे ॥ २५ ॥
इति लब्ध्वा वरं हृष्टः पिता मम महाबलः ।
विजहार यथाकामं वनेषु मधुगन्धिषु ॥ २६ ॥
ततो मे वर्तमाना सा यौवने जननी पुरा ।
विचचाराञ्जना नाम प्रोक्तं जाम्बवता यथा ॥ २७ ॥
दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः ।
संवृद्धा मलये दिव्ये पर्वते कामरूपिणी ॥ २८ ॥
सागरे सा शिरःस्नाता रक्तचन्दनरूषिता ।
प्रकीर्य केशांस्तोयार्द्रांस्तस्थौ मलयमूर्द्धनि ॥ २९ ॥

रूपयौवनसंपन्नां तां दृष्ट्वा मारुतस्तदा ।
बाहुभ्यां संपरिष्वज्य ततः प्राञ्जलिरब्रवीत् ॥ ३० ॥
मारुतोऽस्मि विशालाक्षि प्राणः सर्वशरीरिणां ।
अवशस्त्वामभिगतः कन्दर्पशरपीडितः ॥ ३१ ॥
ममाभिगमनाद्दोषं न प्राप्स्यसि वरानने ।
वानरेन्द्रश्च ते पुत्रो भविष्यति महाबलः ॥ ३२ ।
मम लक्ष्मीश्च तेजश्च बलं वीर्यं च यादृशं ।
तादृशेनोपपन्नस्ते पुत्रः शीघ्रं भविष्यति ॥ ३३ ॥
इत्येवं मारुतः श्रीमान् जनन्यै मे ददौ वरं ।
प्राणदः सर्वभूतानां हुताशनसखोऽनिलः ॥ ३४ ॥
वेगवानप्रमेयश्च वायुराकाशगोचरः ।
तस्याहं भीमवेगस्य शीघ्रगस्य महात्मनः ॥ ३५ ॥
मारुतस्यौरसः पुत्रः प्लवने नास्ति मत्समः ।
उत्सहे चापि विस्तीर्णमुल्लिखन्तमिवाम्बरं ॥ ३६ ॥
मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः ।
ममोरुभुजवेगेन भविष्यति समुद्धतः ॥ ३७ ॥
संमूर्छितमहाग्राहः समुद्रो वरुणालयः ।
बाहुवेगप्रणुन्नेन समुद्रेण समुत्सहे ॥ ३८ ॥
सर्वां प्लावयितुं लङ्कां सपर्वतवनद्रुमां ।
पन्नगाशनमाकाशे पतन्तं पक्षिसेविते ॥ ३९ ॥

अभिभूय जवेनाशु लङ्कां संपादये ध्रुवं ।
संस्पृशन् भुवमागन्तुं पुनरप्यहमुत्सहे ॥४०॥
उदयादुत्थितं चाहं स्वतेजोरश्मिमालिनं ।
अनस्तं गतमादित्यमप्यतिक्रान्तुमुत्सहे ॥४१॥
ऊरुवेगेन महता भीमेन परिकर्षिणा ।
उत्सहेऽहं परिक्रान्तुं सर्वानाकाशगोचरान् ॥४२॥
हरिष्ये चोरुवेगेन प्लवमानो महार्णवं ।
लतानां विविधं पुष्पं पादपानां च सर्वशः ॥४३॥
अनुबन्धेन पुष्पाणां विविधेन सुगन्धिनां ।
भविष्यति च मे पन्थाः स्वर्गमार्ग इवाम्बरे ॥४४॥
पार्श्वे तु मलयस्यास्य रम्ये प्रस्रवणे गिरौ ।
त्यजन्तु हरयः शोकं निर्मोकमिव पन्नगाः ॥४५॥
बलं हि सुमहन्मन्ये आत्मनः प्लवनं प्रति ।
कारणं चाभिधास्यामि श्रोतुमिच्छथ तत्पराः ॥४६॥
ततो निःशब्दसंवृत्ते विस्तीर्णे ज्ञातिमण्डले ।
पवनस्यात्मजः श्रीमान् हनूमान् वाक्यमब्रवीत् ॥४७॥
तदा किल मया बाल्ये मातुरुत्सङ्गशायिना ।
जवापीडनिभस्ताम्रो बालसूर्यो निरीक्षितः ॥४८॥
तत्र कौतूहलं जातं मम स्प्रष्टुं दिवाकरं ।
चापलात् नेत्रदोषस्य मार्तण्डमनुगच्छतः ॥४९॥

जनन्या गिरिसंकाशादङ्कादुत्पत्य सत्वरः ।
दीर्घं कृत्वात्मनः कायमाकाशं क्रान्तवानहं ॥५०॥
समासाद्य तु दीप्तांशुं भास्करं ज्वलनप्रभं ।
निर्दग्धः पतितस्तेन तस्मिन्नेव शिलोच्चये ॥५१॥
मया च पतता तत्र स्वैर्गात्रैः शर्करीकृतं ।
शिखरं च गिरेस्तस्य शिलाश्च समनः शिलाः ॥५२॥
तदिदं विकृतं गात्रं हनुदेशे निरीक्ष्यतां ।
येनास्मि कारणेनाहं हनूमानिति विश्रुतः ॥५३॥
तदहं वानरान् सर्वानङ्गदप्रमुखान् भयात् ।
सुग्रीवान्मोक्षयाम्येको लङ्घनेन महोदधेः ॥५४॥
विमलं घोरमाकाशमुत्पतिष्यन्तमेव हि ।
द्रक्ष्यन्ति निपतन्तं च सर्वभूतानि वानराः ॥५५॥
महामेघप्रतीकाशं मां द्रक्ष्यन्ति दिवौकसः ।
नभ आवृत्य बाहुभ्यां ग्रसमानमिवाम्बरं ॥५६॥
विधमिष्यामि जीमूतान् कम्पयिष्यामि पर्वतान् ।
सागरं क्षोभयिष्यामि प्लवमानः समाहितः ॥५७॥
मनस्विनोर्धर्मवतोर्महासंहननाङ्गयोः ।
ऋष्यमूके निवसतोः शूरयो राजपुत्रयोः ॥५८॥
तयोः प्रियं करिष्यामि वैदेहीलम्भनं महत् ।
आनयिष्यामि वैदेहीं रामस्य महिषीं प्रियां ॥५९॥